# ॥ શ્રીપરશુરામકલ્પસૂત્રમ્ ॥

## .. Shri Parashurama Kalpasutram ..

sanskritdocuments.org

August 20, 2017

# .. Shri Parashurama Kalpasutram ..

# ॥ શ્રીપરશુરામકલ્પસૂત્રમ્ ॥

## Sanskrit Document Information

Text title : parashurAmakalpasUtram

File name : parashurAmakalpasUtram.itx

Category : tantra, vishhnu, dashAvatAra, yoga

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Claudia Weber (first part) DPD (second part)

Proofread by : Claudia Weber, DPD

Source : Parasurama-Kalpasutra by A. Mahadeva Sastri 1923

Latest update : July 27, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીપરશુરામકલ્પસૂત્રમ્ ॥

અનુક્રમણિકા

પ્રથમોભાગસ્ય ખણ્ડાઃ

૧. દીક્ષાવિધિઃ

૨. શ્રીગણનાયકપદ્ધતિઃ

૩. શ્રીક્રમઃ લલિતાઽધિકારઃ

૪. લલિતાક્રમઃ શ્રીચક્રે પરચિત્યાવાહનમ્

૫. લલિતાનવાવરણપૂજા

૬. શ્યામાક્રમઃ

૭. વારાહીક્રમઃ

૮. પરાક્રમઃ

૯. હોમવિધિઃ

૧૦. સર્વસાધારણક્રમઃ

દ્વિતીયોભાગસ્ય ખણ્ડાઃ

૧૧. યન્ત્રવિધાનમ્

૧૨. મન્ત્રવિધાનમ્

૧૩. પ્રસ્તારક્રમઃ

૧૪. નષ્ટોદ્દિષ્ટકથનમ્

૧૫. કૃતનષ્ટનિરૂપણમ્

૧૬. યોનિલિઙ્ગયન્ત્રરચનાવિધાનમ્

૧૭. અઙ્ગવિદ્યા

૧૮. વાસનાધ્યાયઃ

## પ્રથમોભાગઃ

### પ્રથમઃ ખણ્ડઃ દીક્ષાવિધિઃ

અથાતો દીક્ષાં વ્યાખ્યાસ્યામઃ ॥ ૧.૧॥

ભગવાન્ પરમશિવભટ્ટારકઃ શ્રુત્યાદ્યષ્ટાદશવિદ્યાઃ સર્વાણિ દર્શનાનિ લીલયા તત્તદવસ્થાઽઽપન્નઃ પ્રણીય સંવિન્મય્યા ભગવત્યા ભૈરવ્યા સ્વાત્માભિન્નયા પૃષ્ટઃ પઞ્ચભિઃ મુખૈઃ પઞ્ચામ્નાયાન્ પરમાર્થસારભૂતાન્ પ્રણિનાય ॥ ૧.૨॥

તત્રાયં સિદ્ધાન્તઃ ॥ ૧.૩॥

ષટ્ત્રિંશત્તત્ત્વાનિ વિશ્વમ્ ॥ ૧.૪॥

શરીરકઞ્ચુકિતઃ શિવો જીવો નિષ્કઞ્ચુકઃ પરશિવઃ ॥ ૧.૫॥

સ્વવિમર્શઃ પુરુષાર્થઃ ॥ ૧.૬॥

વર્ણાત્મકા નિત્યાઃ શબ્દાઃ ॥ ૧.૭॥

મન્ત્રાણામચિન્ત્યશક્તિતા ॥ ૧.૮॥

સમ્પ્રદાયવિશ્વાસાભ્યાં સર્વસિદ્ધિઃ ॥ ૧.૯॥

વિશ્વાસભૂયિષ્ઠં પ્રામાણ્યમ્ ॥ ૧.૧૦॥

ગુરુમન્ત્રદેવતાઽઽત્મમનઃપવનાનામ્
ઐક્યનિષ્ફાલનાદન્તરાત્મવિત્તિઃ ॥ ૧.૧૧॥

આનન્દં બ્રહ્મણો રૂપં તચ્ચ દેહે વ્યવસ્થિતં તસ્યાભિવ્યઞ્જકાઃ
પઞ્ચમકારાઃ તૈરર્ચનં ગુપ્ત્યા પ્રાકટ્યાન્નિરયઃ ॥ ૧.૧૨॥

ભાવનાદાર્ઢ્યાદાજ્ઞાસિદ્ધિઃ ॥ ૧.૧૩॥

સર્વદર્શનાનિન્દા ॥ ૧.૧૪॥

અગણનં કસ્યાપિ ॥ ૧.૧૫॥

સચ્છિષ્યે રહસ્યકથનમ્ ॥ ૧.૧૬॥

સદા વિદ્યાઽનુસંહતિઃ ॥ ૧.૧૭॥

સતતં શિવતાસમાવેશઃ ॥ ૧.૧૮॥

કામક્રોધલોભમોહમદમાત્સર્યાવિહિતહિંસાસ્તેયલોકવિદ્વિષ્ટવર્જનમ્ ॥ ૧.૧૯॥

એકગુરૂપાસ્તિરસંશયઃ ॥ ૧.૨૦॥

સર્વત્ર નિષ્પરિગ્રહતા ॥ ૧.૨૧॥

ફલં ત્યક્ત્વા કર્મકરણમ્ ॥ ૧.૨૨॥

અનિત્યકર્મલોપઃ ॥ ૧.૨૩॥

મપઞ્ચકાલાભેઽપિ નિત્યક્રમપ્રત્યવમૃષ્ટિઃ ॥ ૧.૨૪॥

નિર્ભયતા સર્વત્ર ॥ ૧.૨૫॥

સર્વં વેદ્યં હવ્યમિન્દ્રિયાણિ સ્રુચઃ શક્તયોજ્વાલાઃ
સ્વાત્મા શિવઃ પાવકઃ સ્વયમેવ હોતા ॥ ૧.૨૬॥

નિર્વિષયચિદ્વિમૃષ્ટિઃ ફલમ્ ॥ ૧.૨૭॥

આત્મલાભાન્ન પરં વિદ્યતે ॥ ૧.૨૮॥

સૈષા શાસ્ત્રશૈલી ॥ ૧.૨૯॥

વેશ્યા ઇવ પ્રકટા વેદાદિવિદ્યાઃ ।

સર્વેષુ દર્શનેષુ ગુપ્તેયં વિદ્યા ॥ ૧.૩૦॥

તત્ર સર્વથા મતિમાન્ દીક્ષેત ॥ ૧.૩૧॥

દીક્ષાસ્તિસ્રઃ શાક્તી શામ્ભવી માન્ત્રી ચેતિ ।
તત્ર શાક્તી શક્તિપ્રવેશનાત્ શામ્ભવી ચરણવિન્યાસાત્
માન્ત્રી મન્ત્રોપદિષ્ટયા સર્વાશ્ચ કુર્યાત્ ॥ ૧.૩૨॥

એકૈકાં વેત્યેકે ॥ ૧.૩૩॥

સદ્ગુરુઃ ક્રમં પ્રવર્ત્ય સાઙ્ગં હુત્વા તરુણોલ્લાસવાન્ શિષ્યમાહૂય વાસસા
મુખં બદ્ધ્વા ગણપતિલલિતાશ્યામાવાર્તાલીપરાપાત્ર
બિન્દુભિસ્તમવોક્ષ્ય સિદ્ધાન્તં શ્રાવયિત્વા ॥ ૧.૩૪॥

તચ્છિરસિ રક્તશુક્લચરણં ભાવયિત્વા તદમૃતક્ષાલિતં
સર્વશરીરમલઙ્કુર્યાત્ ॥ ૧.૩૫॥

તસ્યામૂલમાબ્રહ્મબિલં પ્રજ્વલન્તીં પ્રકાશલહરીં જ્વલદનલનિભાં
ધ્યાત્વા તદ્રશ્મિભિસ્તસ્ય પાપપાશાન્ દગ્ધ્વા ॥ ૧.૩૬॥

ત્રિકટુત્રિફલાચતુર્જાતતક્કોલમદયન્તીસહદેવીદૂર્વા
ભસ્મમૃત્તિકાચન્દનકુઙ્કુમરોચનાકર્પૂરવાસિતજલપૂર્ણં
વસ્ત્રયુગવેષ્ટિતં નૂતનકલશં બાલાષડઙ્ગેનાભ્યર્ચ્ય
શ્રીશ્યામાવાર્તાલીચક્રાણિ નિક્ષિપ્ય તિસૃણામાવરણ
મન્ત્રૈરભ્યર્ચ્ય સંરક્ષ્યાસ્ત્રેણ પ્રદર્શ્ય ધેનુયોની ॥ ૧.૩૭॥

શિવયુક્સૌવર્ણકર્ણિકે સ્વરદ્વન્દ્વજુષ્ટકિઞ્જલ્કાષ્ટકે ।

ક ચ ટ ત પ ય શ ળાક્ષરવર્ગાષ્ટયુક્તાષ્ટદલે ॥

દિગષ્ટકસ્થિત ઠં વં ચતુરશ્રે માતૃકાયન્ત્રે શિષ્યં નિવેશ્ય ।
તેન કુમ્ભામ્ભસા તિસૃભિઃ વિદ્યાભિઃ સ્નપયેત્ ॥ ૧.૩૮॥

સદુકૂલં સાલેપં સાભરણં સમાલં સુપ્રસન્નં શિષ્યં પાર્શ્વે
નિવેશ્ય માતૃકાં તદઙ્ગે વિન્યસ્ય વિમુક્તમુખકર્પટસ્ય તસ્ય
હસ્તે ત્રીન્ પ્રથમસિક્તાન્ ચન્દનોક્ષિતાન્ દ્વિતીયખણ્ડાન્
પુષ્પખણ્ડાન્નિક્ષિપ્ય તત્ત્વમન્ત્રૈર્ગ્રાસયિત્વા
દક્ષિણકર્ણે બાલમુપદિશ્ય પશ્ચાદિષ્ટમનું વદેત્ ॥ ૧.૩૯॥

તતસ્તસ્ય શિરસિ સ્વચરણં નિક્ષિપ્ય સર્વાન્ મન્ત્રાન્ સકૃદ્ વા
ક્રમેણ વા યથાઽધિકારમુપદિશ્ય સ્વાઙ્ગેષુ કિમપ્યઙ્ગં શિષ્યં
સ્પર્શયિત્વા તદઙ્ગમાતૃકાવર્ણાદિ દ્વ્યક્ષરં ત્ર્યક્ષરં
ચતુરક્ષરં વા આનન્દનાથશબ્દાન્તં તસ્ય નામ દિશેત્ ॥ ૧.૪૦॥

બાલોપદિષ્ટેઃ પૂર્વમાત્મનઃ પાદુકાં ષટ્તારયુક્તાં દદ્યાત્ ॥ ૧.૪૧॥

આચારાનનુશિષ્ય હાર્દચૈતન્યમામૃશ્ય વિદ્યાત્રયેણ
તદઙ્ગં ત્રિઃ પરિમૃજ્ય પરિરભ્ય મૂર્ધન્યવઘ્રાય સ્વાત્મરૂપં
કુર્યાત્ ॥ ૧.૪૨॥

શિષ્યોઽપિ પૂર્ણતાં ભાવયિત્વા કૃતાર્થસ્તં ગુરું યથાશક્તિ
વિત્તૈરુપચર્ય વિદિતવેદિતવ્યોઽશેષમન્ત્રાધિકારી ભવેદિતિ
શિવમ્ ॥ ૧.૪૩॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
દીક્ષાવિધિર્ નામ પ્રથમઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧॥

---

## દ્વિતીયઃ ખણ્ડઃ શ્રીગણનાયકપદ્ધતિઃ

ઇત્થં સદ્ગુરોરાહિતદીક્ષઃ મહાવિદ્યાઽઽરાધનપ્રત્યૂહાપોહાય
ગાણનાયકીં પદ્ધતિમામૃશેત્ ॥ ૨.૧॥

બ્રાહ્મે મુહૂર્તે ઉત્થાય દ્વાદશાન્તે

સહસ્રદલકમલકર્ણિકામધ્યનિવિષ્ટગુરુચરણયુગલ
વિગલદમૃતરસવિસરપરિપ્લુતાખિલાઙ્ગો
હૃદયકમલમધ્યે જ્વલન્તં
ઉદ્યદરુણકોટિપાટલમશેષદોષનિર્વેષભૂતં
અનેકપાનનં નિયમિતપવનમનોગતિર્ધ્યાત્વા
તત્પ્રભાપટલપાટલીકૃતતનુઃ બહિર્નિર્ગત્ય મુક્તમલમૂત્રો
દન્તધાવનસ્નાન-વસ્ત્રપરિધાનસૂર્યાર્ઘ્યદાનાનિ વિધાય
ઉદ્યદાદિત્યવર્તિને મહાગણપતયે તત્પુરુષાય વિદ્મહે
વક્રતુણ્ડાય ધીમહિ ॥ તન્નો દન્તી પ્રચોદયાત્ ઇત્યર્ઘ્યં દત્વા
નિત્યકૃત્યં વિધાય ચતુરાવૃત્તિતર્પણં કુર્યાત્ ।
આયુરારોગ્યમૈશ્વર્યં બલં પુષ્ટિર્મહદ્યશઃ ।
કવિત્વં ભુક્તિમુક્તી ચ ચતુરાવૃત્તિતર્પણાત્ ॥ ૨.૨॥

પ્રથમં દ્વાદશવારં મૂલમન્ત્રેણ તર્પયિત્વા મન્ત્રાષ્ટાવિંશતિવર્ણાન્
સ્વાહાઽન્તાનેકૈકં ચતુર્વારં મૂલં ચ ચતુર્વારં તર્પયિત્વા પુનઃ
શ્રીશ્રીપતિગિરિજાગિરિજાપતિરતિરતિપતિમહીમહીપતિ
મહાલક્ષ્મીમહાલક્ષ્મીપતિ ઋદ્ધ્યામોદસમૃદ્ધિપ્રમોદકાન્તિ
સુમુખમદનાવતીદુર્મુખમદદ્રવાઽવિઘ્નદ્રાવિણીવિઘ્નકર્તૃ
વસુધારાશઙ્ખનિધિવસુમતીપદ્મનિધિત્રયોદશ
મિથુનેષ્વેકૈકાં દેવતાં ચતુર્વારં મૂલં ચતુર્વારં ચ તર્પયેતેવં
ચતુશ્ચત્વારિંશદધિકચતુશ્શતતર્પણાનિ ભવન્તિ ॥ ૨.૩॥

અથ યાગવિધિઃ - ગૃહમાગત્ય સ્થણ્ડિલમુપલિપ્ય દ્વારદેશ
ઉભયપાર્શ્વયોર્ભદ્રકાલ્યૈ ભૈરવાય-દ્વારોર્ધ્વે લમ્બોદરાય
નમઃ ઇતિ અન્તઃપ્રવિશ્ય આસનમન્ત્રેણ આસને સ્થિત્વા પ્રાણાન્
આયમ્ય ષડઙ્ગાનિ વિન્યસ્ય મૂલેન વ્યાપકં કૃત્વા સ્વાત્મનિ દેવં
સિદ્ધલક્ષ્મીસમાશ્લિષ્ટપાર્શ્વમર્ધેન્દુશેખરમારક્તવર્ણં
માતુલુઙ્ગગદાપુણ્ડ્રેક્ષુકાર્મુકશૂલસુદર્શનશઙ્ખ-
પાશોત્પલધાન્ય-મઞ્જરીનિજદન્તાઞ્ચલરત્ન
કલશપરિષ્કૃતપાણ્યેકાદશકં
પ્રભિન્નકટમાનન્દપૂર્ણમશેષવિઘ્નધ્વંસનિઘ્નં
વિઘ્નેશ્વરં ધ્યાત્વા ॥ ૨.૪॥

પુરતો મૂલસપ્તાભિમન્ત્રિતેન ગન્ધાક્ષતપુષ્પપૂજિતેન શુદ્ધેન
વારિણા ત્રિકોણષટ્કોણવૃત્તચતુરશ્રાણિ વિધાય તસ્મિન્
પુષ્પાણિ વિકીર્ય વહ્નીશાસુરવાયુષુ મધ્યે દિક્ષુ ચ ષડઙ્ગાનિ
વિન્યસ્ય અગ્નિમણ્ડલાય દશકલાઽઽત્મને અર્ઘ્યપાત્રાધારાય
નમઃ સૂર્યમણ્ડલાય દ્વાદશકલાઽઽત્મને અર્ઘ્યપાત્રાય
નમઃ સોમમણ્ડલાય ષોડશકલાઽઽત્મને અર્ઘ્યામૃતાય નમઃ
ઇતિ શુદ્ધજલમાપૂર્ય અસ્ત્રેણ સંરક્ષ્ય કવચેનાવકુણ્ઠ્ય
ધેનુયોનિમુદ્રાં પ્રદર્શયેત્ ॥ ૨.૫॥

સપ્તવારમભિમન્ત્ર્ય તજ્જલવિપ્રુડ્ભિરાત્માનં પૂજોપકરણાનિ
ચ સમ્પ્રોક્ષ્ય તજ્જલેન પૂર્વોક્તં મણ્ડલં પરિકલ્પ્ય તદ્વદ્
આદિમં સંયોજ્ય તત્રોપાદિમં મધ્યમં ચ નિક્ષિપ્ય
વહ્ન્યર્કેન્દુકલાઃ અભ્યર્ચ્ય વક્રતુણ્ડગાયત્ર્યા ગણાનાં
ત્વેત્યનયા ઋચા ચાભિમન્ત્ર્ય અસ્ત્રાદિરક્ષણં કૃત્વા
તદ્બિન્દુભિસ્ત્રિશઃ શિરસિ ગુરુપાદુકામારાધયેત્ ॥ ૨.૬॥

પુરતો રક્તચન્દનનિર્મિતે પીઠે મહાગણપતિપ્રતિમાયાં
વા ચતુરસ્રાષ્ટદલષટ્કોણત્રિકોણમયે ચક્રે
વા તીવ્રાયૈ જ્વાલિન્યૈ નન્દાયૈ ભોગદાયૈ કામરૂપિણ્યૈ ઉગ્રાયૈ
તેજોવત્યૈ સત્યાયૈ વિઘ્નનાશિન્યૈ ૠ ધર્માય ૠં જ્ઞાનાય
ૡં વૈરાગ્યાય ૡૃં ઐશ્વર્યાય ૠ અધર્માય ૠં અજ્ઞાનાય
ૡં અવૈરાગ્યાય ૡૃં અનૈશ્વર્યાય નમ ઇતિ પીઠશક્તીર્ધર્માદ્યષ્ટકં
ચાભ્યર્ચ્ય મૂલમુચ્ચાર્ય મહાગણપતિં
આવાહયામીત્યાવાહ્ય પઞ્ચધોપચર્ય દશધા સન્તર્પ્ય મૂલેન
મિથુનાઙ્ગબ્રાહ્મ્યાદીન્દ્રાદિરૂપપઞ્ચાવરણપૂજાં કુર્યાત્
॥ ૨.૭॥

ત્રિકોણે દેવઃ તસ્ય ષડસ્રસ્યાન્તરાલે
શ્રીશ્રીપત્યાદિચતુર્મિથુનાનિ અઙ્ગાનિ ચ
ઋદ્ધ્યામોદાદિષણ્મિથુનાનિ ષડસ્રે મિથુનદ્વયં
ષડસ્રોભયપાર્શ્વયોસ્તત્સન્ધિષ્વઙ્ગાનિ બ્રાહ્મયાદ્યાઃ
અષ્ટદલે ચતુરસ્રાષ્ટદિક્ષ્વિન્દ્રાદ્યાઃ પૂજ્યાઃ સર્વત્ર
દેવતાનામસુ શ્રીપૂર્વં પાદુકામુચ્ચાર્ય પૂજયામીત્યષ્ટાક્ષરીં

યોજયેત્ ॥ ૨.૮॥

એવં પઞ્ચાવરણીમિષ્ટ્વા પુનર્દેવં ગણનાથં દશધોપતર્પ્ય
ષોડશોપચારૈરુપચર્ય પ્રણવમાયાઽન્તે સર્વવિઘ્નકૃદ્ભયઃ
સર્વભૂતેભ્યો હું સ્વાહા - ઇતિ ત્રિઃ પઠિત્વા બલિં દત્વા
ગણપતિબુદ્ધ્યૈકં બટુકં સિદ્ધલક્ષ્મીબુદ્ધ્યૈકાં શક્તિં ચાહૂય
ગન્ધપુષ્પાક્ષતૈરભ્યર્ચ્યાદિમોપાદિમમધ્યમાન્ દત્વા મમ
નિર્વિઘ્નં મન્ત્રસિદ્ધિર્ભૂયાદિત્યનુગ્રહં કારયિત્વા નમસ્કૃત્ય
યથાશક્તિ જપેત્ ॥ ૨.૯॥

યદ્યગ્નિકાર્યસમ્પત્તિઃ બલેઃ પૂર્વં વિધિવત્ સંસ્કૃતેઽગ્નૌ
સ્વાહાઽન્તૈઃ શ્રીશ્રીપત્યાદિવિઘ્નકર્તૃપર્યન્તૈઃ
મન્ત્રૈર્હુત્વા પુનરાગત્ય દેવં ત્રિવારં સન્તર્પ્ય યોગ્યૈસ્સહ
મપઞ્ચકં ઉરરીકૃત્ય મહાગણપતિમાત્મન્યુદ્વાસ્ય
સિદ્ધસઙ્કલ્પઃ સુખી વિહરેત્ ઇતિ શિવમ્ ॥ ૨.૧૦॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
ગણનાયકપદ્ધતિર્ નામ દ્વિતીયઃ ખણ્ડઃ સમાપ્તઃ ॥ ૨॥

---

## તૃતીયઃ ખણ્ડઃ શ્રીક્રમઃ લલિતાઽધિકારઃ

એવં ગણપતિમિષ્ટ્વા વિધૂતસમસ્તવિઘ્નવ્યતિકરઃ
શક્તિચક્રૈકનાયિકાયાઃ શ્રીલલિતાયાઃ ક્રમમારભેત ॥ ૩.૧॥

બ્રાહ્મે મુહૂર્તે બ્રાહ્મણો મુક્તસ્વાપઃ પાપવિલાપાય પરમશિવરૂપં
ગુરુમભિમૃશ્ય ॥ ૩.૨॥

મૂલાદિવિધિબિલપર્યન્તં તડિત્કોટિકડારાં
તરુણદિવાકરપિઞ્જરાં જ્વલન્તીં મૂલસંવિદં ધ્યાત્વા
તદ્રશ્મિનિહતકશ્મલજાલઃ કાદિં હાદિં વા મૂલવિદ્યાં મનસા
દશવારમાવર્ત્ય ॥ ૩.૩॥

સ્નાનકર્મણિ પ્રાપ્તે મૂલેન દત્વા ત્રિઃ સલિલાઞ્જલીન્ ત્રિસ્તદભિમન્ત્રિતાઃ

પીત્વાઽપસ્ત્રિસ્સન્તર્પ્ય ત્રિઃ પ્રોક્ષ્યાત્માનં
પરિધાય વાસસી હ્રાં હ્રીં હ્રૂં સઃ ઇત્યુક્ત્વા માર્તાણ્ડભૈરવાય
પ્રકાશશક્તિસહિતાય સ્વાહેતિ ત્રિસ્સવિત્રે દત્તાર્ઘ્યઃ ॥ ૩.૪॥

તન્મણ્ડલમધ્યે નવયોનિચક્રમનુચિન્ત્ય વાચમુચ્ચાર્ય
ત્રિપુરસુન્દરિ વિદ્મહે કામમુચ્ચાર્ય પીઠકામિનિ ધીમહિ શક્તિં
ઉચ્ચાર્ય તન્ નઃ ક્લિન્ના પ્રચોદયાદ્ ઇતિ ત્રિર્મહેશ્યૈ દત્તાર્ઘ્યઃ
શતમષ્ટોત્તરમામૃશ્ય મનું મૌનમાલમ્બ્ય ॥ ૩.૫॥

યાગમન્દિરં ગત્વા ક્લૃપ્તાકલ્પસ્સઙ્કુલ્પાકલ્પો વા પીઠમનુના આસને
સમુપવિષ્ટઃ ॥ ૩.૬॥

ત્રિતારીમુચ્ચાર્ય રક્તદ્વાદશશક્તિયુક્તાય દીપનાથાય નમ
ઇતિ ભૂમૌ મુઞ્ચેત્ પુષ્પાઞ્જલિમ્ ॥ ૩.૭॥

સર્વેષાં મન્ત્રાણામાદૌ ત્રિતારીસંયોગઃ । ત્રિતારી વાઙ્માયાકમલાઃ
॥ ૩.૮॥

પુરતઃ પઞ્ચશક્તિચતુઃશ્રીકણ્ઠમેલનરૂપં
ભૂસદનત્રયવલિત્રયભૂપપત્રદિક્પત્રભુવનાર
દ્રુહિણારવિધિકોણદિક્કોણત્રિકોણબિન્દુચક્રમયં
મહાચક્રરાજં સિન્દૂરકુઙ્કુમલિખિતં
ચામીકરકલધૌતપઞ્ચલોહરત્નસ્ફટિકાદ્યુત્કીર્ણં વા
નિવેશ્ય ॥ ૩.૯॥

તત્ર મહાચક્રે અમૃતામ્ભોનિધયે રત્નદ્વીપાય
નાનાવૃક્ષમહોદ્યાનાય કલ્પવૃક્ષવાટિકાયૈ
સન્તાનવાટિકાયૈ હરિચન્દનવાટિકાયૈ મન્દારવાટિકાયૈ
પારિજાતવાટિકાયૈ કદમ્બવાટિકાયૈ પુષ્પરાગરત્નપ્રાકારાય
પદ્મરાગરત્નપ્રાકારાય ગોમેધરત્નપ્રાકારાય
વજ્રરત્નપ્રાકારાય વૈડૂર્યરત્નપ્રાકારાય
ઇન્દ્રનીલરત્નપ્રાકારાય મુક્તારત્નપ્રાકારાય
મરકતરત્નપ્રાકારાય વિદ્રુમરત્નપ્રાકારાય
માણિક્યમણ્ડપાય સહસ્રસ્તમ્ભમણ્ડપાય અમૃતવાપિકાયૈ
આનન્દવાપિકાયૈ વિમર્શવાપિકાયૈ બાલાતપોદ્ગારાય

ચન્દ્રિકોદ્ધારાય મહાશૃઙ્ગારપરિધાયૈ
મહાપદ્માટવ્યૈ ચિન્તામણિગૃહરાજાય
પૂર્વામ્નાયમયપૂર્વદ્વારાય દક્ષિણામ્નાયમયદક્ષિણદ્વારાય
પશ્ચિમામ્નાયમયપશ્ચિમદ્વારાયોત્તરામ્નાયમયોત્તરદ્વારાય
રત્નપ્રદીપવલયાય મણિમયમહાસિંહાસનાય
બ્રહ્મમયૈકમઞ્ચપાદાય વિષ્ણુમયૈકમઞ્ચપાદાય
રુદ્રમયૈકમઞ્ચપાદાય ઈશ્વરમયૈકમઞ્ચપાદાય
સદાશિવમયૈકમઞ્ચફલકાય હંસતૂલતલ્પાય
હંસતૂલમહોપધાનાય કૌસુમ્ભાસ્તરણાય મહાવિતાનકાય
મહાજવનિકાયૈ નમઃ - ઇતિ ચતુશ્ચત્વારિંશન્મન્ત્રૈસ્તત્તદખિલં
ભાવયિત્વા અર્ચયિત્વા ॥ ૩.૧૦॥

ગન્ધપુષ્પાક્ષતાદીંશ્ચ દક્ષિણભાગે દીપાન્ અભિતો દત્ત્વા મૂલેન
ચક્રમભ્યર્ચ્ય મૂલત્રિખણ્ડૈઃ પ્રથમત્ર્યસ્રે ॥ ૩.૧૧॥

વાય્વગ્નિસલિલવર્ણયુક્પ્રાણાયામૈઃ શોષણં સન્દહનમાપ્લાવનં
ચ વિધાય ॥ ૩.૧૨॥

ત્રિઃ પ્રાણાન્ આયમ્ય ॥ ૩.૧૩॥

અપસર્પન્તુ તે ભૂતા યે ભૂતા ભુવિ સંસ્થિતાઃ ।
યે ભૂતા વિઘ્નકર્તારસ્તે નશ્યન્તુ શિવાજ્ઞયા ।
ઇતિ વામપાદપાર્ષ્ણિઘાતકરાસ્ફોટસમુદઞ્ચિતવક્ત્રસ્તાલત્રયં
દત્વા દેવ્યહમ્ભાવયુક્તઃ સ્વશરીરે
વજ્રકવચન્યાસજાલં વિદધીત ॥ ૩.૧૪॥

બિન્દુયુક્ શ્રીકણ્ઠાનન્તતાર્તીયૈઃ મધ્યમાદિતલપર્યન્તં
કૃતકરશુદ્ધિઃ ॥ ૩.૧૫॥

કુમારીમુચ્ચાર્ય મહાત્રિપુરસુન્દરીપદમાત્માનં રક્ષ રક્ષેતિ
હૃદયે અઞ્જલિં દત્ત્વા ॥ ૩.૧૬॥

માયાકામશક્તીરુચ્ચાર્ય દેવ્યાત્માસનાય નમઃ - ઇતિ સ્વસ્યાસનં
દત્ત્વા ॥ ૩.૧૭॥

શિવયુગ્બાલામુચ્ચાર્ય શ્રીચક્રાસનાય નમઃ -

શિવભૃગુયુગ્બાલામુચ્ચાર્ય સર્વમન્ત્રાસનાય નમો
ભુવના - મદનૌ બ્લેમુચ્ચાર્ય સાધ્યસિદ્ધાસનાય નમઃ - ઇતિ
ચક્રમન્ત્રદેવતાઽઽસનં ત્રિભિર્મન્ત્રૈશ્ચક્રે કૃત્વા ॥ ૩.૧૮॥

બાલા-દ્વિરાવૃત્ત્યા ત્રિદ્વ્યેકદશત્રિસઙ્ખ્યાઙ્ગુલિવિન્યાસૈઃ
ક્લૃપ્તષડઙ્ગઃ ॥ ૩.૧૯॥

સબિન્દૂનચોબ્લૂમુચ્ચાર્ય વશિનીવાગ્દેવતાયૈ નમઃ - ઇતિ
શિરસિ । સર્વત્ર વર્ગાણાં બિન્દુયોગઃ । કવર્ગં કલહ્રીં ચ
નિગદ્ય કામેશ્વરીવાગ્દેવતાયૈ નમઃ - ઇતિ લલાટે । ચું ગદિત્વા
ન્વ્લીં મોદિનીવાગ્દેવતાયૈ નમઃ - ઇતિ ભ્રૂમધ્યે । ટું ભણિત્વા
ય્લૂં વિમલાવાગ્દેવતાયૈ નમઃ - ઇતિ કણ્ઠે । તું ચ પ્રોચ્ય જ્મ્રીં
અરુણાવાગ્દેવતાયૈ નમઃ - ઇતિ હૃદિ । પું ચ હ્સ્લ્વ્યૂં ઉચ્ચાર્ય
જયિનીવાગ્દેવતાયૈ નમઃ - ઇતિ નાભૌ । યાદિચતુષ્કં ઝ્મ્ર્યૂં
ઉચ્ચાર્ય સર્વેશ્વરીવાગ્દેવતાયૈ નમઃ - ઇતિ લિઙ્ગે । શાદિષટ્કં
ક્ષ્મ્રીં આખ્યાય કૌલિનીવાગ્દેવતાયૈ નમઃ - ઇતિ મૂલે ॥ ૩.૨૦॥

મૂલવિદ્યાપઞ્ચદશવર્ણાન્ મૂર્ધ્નિ મૂલે હૃદિ ચક્ષુસ્ત્રિતયે
શ્રુતિદ્વયમુખભુજયુગલપૃષ્ઠજાનુયુગલનાભિષુ
વિન્યસ્ય ષોઢા ચક્રે ન્યસ્યાન્યસ્ય વા ॥ ૩.૨૧॥

શુદ્ધામ્ભસા વામભાગે ત્રિકોણષટ્કોણવૃત્તચતુરશ્રમણ્ડલં
કૃત્વા પુષ્પૈરભ્યર્ચ્ય સાધારં શઙ્ખં પ્રતિષ્ઠાપ્ય
શુદ્ધજલમાપૂર્ય આદિમબિન્દું દત્ત્વા ષડઙ્ગેનાભ્યર્ચ્ય વિદ્યયા અભિમન્ત્ર્ય
તજ્જલવિપ્રુડ્ભિઃ આત્માનં પૂજોપકરણાનિ ચ સમ્પ્રોક્ષ્ય ॥ ૩.૨૨॥

તજ્જલેન ત્રિકોણષટ્કોણવૃત્તચતુરસ્રમણ્ડલં કૃત્વા
મધ્યં વિદ્યયા વિદ્યાખણ્ડૈસ્ત્રિકોણં બીજાવૃત્ત્યા ષડશ્રં
સમ્પૂજ્ય વાચમુચ્ચાર્ય અગ્નિમણ્ડલાય દશકલાઽઽત્મને
અર્ઘ્યપાત્રાધારાય નમઃ - ઇતિ પ્રતિષ્ઠાપ્ય આધારં પ્રપૂજ્ય પાવકીઃ
કલાઃ ॥ ૩.૨૩॥

મદનાદુપરિ સૂર્યમણ્ડલાય દ્વાદશકલાઽઽત્મને અર્ઘ્યપાત્રાય
નમઃ ઇતિ સંવિધાય પાત્રં સંસ્પૃશ્ય કલાઃ સૌરીઃ સૌઃ સોમમણ્ડલાય
ષોડશકલાઽઽત્મને અર્ઘ્યામૃતાય નમઃ - ઇતિ પૂરયિત્વા આદિમં

દત્ત્વોપાદિમમધ્યમૌ પૂજયિત્વા વિધોઃ કલાષોડશકમ્ ॥ ૩.૨૪॥

તત્ર વિલિખ્ય ત્ર્યસ્રમકથાદિમયરેખં
હલક્ષયુગાન્તસ્થિતહંસભાસ્વરં
વાક્કામશક્તિયુક્તકોણં હંસેનારાધ્ય બહિર્વૃત્તષટ્કોણં
કૃત્વા ષડસ્રં ષડઙ્ગેન પુરોભાગાદ્યભ્યર્ચ્ય મૂલેન સપ્તધા
અભિમન્ત્ર્ય દત્તગન્ધાક્ષતપુષ્પધૂપદીપઃ તદ્વિપ્રુડ્ભિઃ
પ્રોક્ષિતપૂજાદ્રવ્યઃ સર્વં વિદ્યામયં કૃત્વા તત્ સ્પૃષ્ટ્વા
ચતુર્નવતિમન્ત્રાન્ જપેત્ ॥ ૩.૨૫॥

ત્રિતારીનમસ્સમ્પુટિતાઃ તેજસ્ત્રિતયકલા અષ્ટત્રિંશત્ ।
સૃષ્ટિઋદ્ધિસ્મૃતિમેધાકાન્તિલક્ષ્મીદ્યુતિસ્થિરા-
સ્થિતિસિદ્ધયો બ્રહ્મકલા દશ । જરા પાલિની
શાન્તિરીશ્વરી રતિકામિકે વરદાહ્લાદિની પ્રીતિર્દીર્ઘા વિષ્ણુકલા દશ ।
તીક્ષ્ણા રૌદ્રી ભયા નિદ્રા તન્દ્રી ક્ષુધા ક્રોધિની
ક્રિયોદ્ગારીમૃત્યવો રુદ્રકલા દશ ।
પીતા શ્વેતાઽરુણાઽસિતાશ્ચતસ્ર ઈશ્વરકલાઃ ।
નિવૃત્તિપ્રતિષ્ઠાવિદ્યાશાન્તીન્ધિકાદીપિકારેચિકામોચિકા
પરાસૂક્ષ્માસૂક્ષ્મામૃતા-જ્ઞાનાજ્ઞાનામૃતાપ્યાયિનીવ્યાપિની
વ્યોમરૂપાઃ ષોડશ સદાશિવકલાઃ ॥

હંસશ્શુચિષદ્વસુરન્તરિક્ષસદ્ધોતાવ્વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા ગોજા ઋતજા
અદ્રિજા ઋતં બૃહત્ ॥

પ્ર તદ્વિષ્ણુઃ સ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ (?) વ્વિશ્વા ॥

ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્ મૃત્યોર્મુક્ષીય મામૃતાત્ ॥

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્ પરમં પદમ્ ॥

વિષ્ણુર્યોનિં કલ્પયતુ ત્વષ્ટા રૂપાણિ પિંશતુ ।
આસિઞ્ચતુ પ્રજાપતિર્ધાતા ગર્ભં દધાતુ તે ॥

ગર્ભં ધેહિ સિનીવાલિ ગર્ભં ધેહિ સરસ્વતિ ।
ગર્ભં તે અશ્વિનૌ દેવાવાધત્તાં પુષ્કરસ્રજા ॥

ઇત્યેતે પઞ્ચમન્ત્રાઃ ॥

મૂલવિદ્યા ચાહત્ય ચતુર્નવતિમન્ત્રાઃ ॥ ૩.૨૬॥

અથ હૈકે પઞ્ચભિરખણ્ડાદ્યૈરભિમન્ત્રણમામનન્તિ ॥ ૩.૨૭॥

અખણ્ડૈકરસાનન્દકરે પરસુધાઽઽત્મનિ ।
સ્વચ્છન્દસ્ફુરણમત્ર નિધેહ્યકુલનાયિકે ॥

અકુલસ્થામૃતાકારે શુદ્ધજ્ઞાનકરે પરે ।
અમૃતત્વં નિધેહ્યસ્મિન્ વસ્તુનિ ક્લિન્નરૂપિણિ ॥

તદ્રૂપિણ્યૈકરસ્યત્વં કૃત્વા હ્યેતત્સ્વરૂપિણિ ।
ભૂત્વા પરામૃતાકારા મયિ ચિત્સ્ફુરણં કુરુ ॥

ઇતિ તિસ્રોઽનુષ્ટુભો વિદ્યાઃ ॥ ૩.૨૮॥

અથો વાચં બ્લૂં ઝૌમિતિ જૂં સઃ - ઇતિ ચોક્ત્વા અમૃતે અમૃતોદ્ભવે
અમૃતેશ્વરિ અમૃતવર્ષિણિ અમૃતં સ્રાવય સ્રાવય સ્વાહેતિ ચતુર્થો
મન્ત્રઃ ॥ ૩.૨૯॥

વાગ્ભવો વદ વદ તતો વાગ્વાદિનિ વાઙ્મદનક્લિન્ને
ક્લેદિનિ ક્લેદય મહાક્ષોભં કુરુયુગલં માદનં શક્તિર્મોક્ષં
કુરુ કુરુ શબ્દો હસ ચતુર્દશપઞ્ચદશપિણ્ડઃ
સહચતુર્દશષોડશપિણ્ડશ્ચેતિ પઞ્ચમીયં વિદ્યૈતાભિઃ
અભિમન્ત્ર્ય જ્યોતિર્મયં તદ્ અર્ઘ્યં વિધાય ॥ ૩.૩૦॥

તદ્બિન્દુભિસ્ત્રિશઃ શિરસિ ગુરુપાદુકામિષ્ટ્વા આર્દ્રં જ્વલતિ
જ્યોતિરહમસ્મિ જ્યોતિર્જ્વલતિ બ્રહ્માહમસ્મિ યોઽહમસ્મિ
બ્રહ્માહમસ્મિ અહમસ્મિ બ્રહ્માહમસ્મિ અહમેવાહં માં જુહોમિ
સ્વાહેતિ તદ્બિન્દુમાત્મનઃ કુણ્ડલિન્યાં જુહુયાત્ ॥ ૩.૩૧॥

એતદર્ઘ્યશોધનમિતિ શિવમ્ ॥ ૩.૩૨॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
શ્રીક્રમ નામ તૃતીયઃ ખણ્ડઃ સમાપ્તઃ ॥ ૩॥

---

ચતુર્થઃ ખણ્ડઃ લલિતાક્રમઃ શ્રીચક્રે પરચિત્યાવાહનમ્

અથ હૃચ્ચક્રસ્થિતામ્
અન્તસ્સુષુમ્ણાપદ્માટવીનિર્ભેદનકુશલાં નિરસ્તમોહતિમિરાં
શિવદીપદીપ્તિમાદ્યાં સંવિદં વહન્નાસપુટેન નિર્ગમય્ય
લીલાઽઽકલિતવપુષં તાં ત્રિખણ્ડમુદ્રાશિખણ્ડે કુસુમાઞ્જલૌ
હસ્તે સમાનીય ॥ ૪.૧॥

માયાલક્ષ્મી પરા ઉચ્ચાર્ય દેવીનામ ચામૃતચૈતન્યમૂર્તિં
કલ્પયામિ નમઃ - ઇતિ કલ્પયિત્વા ॥ ૪.૨॥

હસરયુજં વાચં હસયુક્તાં કલરીં
હસરચતુર્દશષોડશાનપ્યુચ્ચાર્ય
મહાપદ્મવનાન્તઃસ્થે કારણાનન્દવિગ્રહે ।
સર્વભૂતહિતે માતરેહ્યેહિ પરમેશ્વરિ ॥

ઇતિ બૈન્દવચક્રે પરચિતિમાવાહ્ય ॥ ૪.૩॥

ચતુષ્ષષ્ટ્યુપચારાન્ કુર્યાત્ । સર્વે ઉપચારમન્ત્રાઃ ત્રિતારીપૂર્વાઃ
કલ્પયામિ નમઃ - ઇત્યન્તાઃ કર્તવ્યાઃ ॥ ૪.૪॥

ત્રિતારીમુચ્ચાર્ય પાદ્યં કલ્પયામિ નમઃ ઇતિ ક્રમેણ
આભરણાવરોપણં સુગન્ધિતૈલાભ્યઙ્ગં મજ્જનશાલાપ્રવેશનં
મજ્જનમણ્ડપમણિપીઠોપવેશનં દિવ્યસ્નાનીયોદ્વર્તનમ્
ઉષ્ણોદકસ્નાનમ્ કનકકલશચ્યુતસકલતીર્થાભિષેકં
ધૌતવસ્ત્રપરિમાર્જનમ્
અરુણદુકૂલપરિધાનમ્ અરુણકુચોત્તરીયમ્
આલેપમણ્ડપપ્રવેશનમાલેપમણ્ડપમણિપીઠોપવેશનં

ચન્દનાગરુકુઙ્કુમ સઙ્કુમૃગમદકર્પૂરકસ્તૂરીગોરોચનાદિ
દિવ્યગન્ધસર્વાઙ્ગીણવિલેપનં કેશભરસ્ય કાલાગરુધૂપં
મલ્લિકામાલતીજાતીચમ્પકાશોકશતપત્રપૂગકુડ્મલી
પુન્નાગકલ્હાર-મુખ્યસર્વર્તુકુસુમમાલાં
ભૂષણમણ્ડપપ્રવેશનં ભૂષણમણ્ડપમણિપીઠોપવેશનં
નવમણિમકુટં ચન્દ્રશકલં સીમન્તસિન્દૂરં તિલકરત્નં
કાલાઞ્જનં પાલીયુગલં મણિકુણ્ડલયુગલં નાસાભરણમ્
અધરયાવકં પ્રથમભૂષણં કનકચિન્તાકં પદકં મહાપદકં
મુક્તાવલિમેકાવલિં છન્નવીરં કેયૂરયુગલચતુષ્ટયં
વલયાવલિમૂર્મિકાવલિં કાઞ્ચીદામ કટિસૂત્રં સૌભાગ્યાભરણં
પાદકટકં રત્નનૂપુરં પાદાઙ્ગુલીયકમેકકરે પાશમન્યકરે
અઙ્કુશમિતરકરે પુણ્ડ્રેક્ષુચાપમપરકરે પુષ્પબાણાન્
શ્રીમન્માણિક્યપાદુકે સ્વસમાનવેષાભિરાવરણદેવતાભિઃ
સહ મહાચક્રાધિરોહણં કામેશ્વરાઙ્કુપર્યઙ્કોપવેશનમ્
અમૃતાસવચષકમાચમનીયં કર્પૂરવીટિકામ્
આનન્દોલ્લાસવિલાસ-હાસં મઙ્ગલારાર્તિકં છત્રં ચામરયુગલં
દર્પણં તાલવૃન્તં ગન્ધં પુષ્પં ધૂપં દીપં નૈવેદ્યં કલ્પયામિ
નમઃ - ઇતિ ચતુષ્ષષ્ટ્યુપચારાન્ વિધાય ॥ ૪.૫॥

નવમુદ્રાશ્ચ પ્રદર્શ્ય ॥ ૪.૬॥

મૂલેન ત્રિધા સન્તર્પ્ય ॥ ૪.૭॥

દેવ્યા અગ્નીશાસુરવાયુષુ મધ્યે દિક્ષુ ચ ષડઙ્ગાનિ પૂજયિત્વા ॥ ૪.૮॥

વાક્સકલહ્રીં નિત્યક્લિન્ને મદદ્રવે સૌઃ - ઇતિ કામેશ્વરી ।
સર્વત્ર નિત્યાશ્રીપાદુકેતિ યોજ્યમ્ । વાગ્ભગભુગે ભગિનિ
ભગોદરિ ભગમાલે ભગાવહે ભગગુહ્યે ભગયોનિ ભગનિપાતિનિ
સર્વભગવશઙ્કરિ ભગરૂપે નિત્યક્લિન્ને ભગસ્વરૂપે સર્વાણિ
ભગાનિ મે હ્યાનય વરદે રેતે સુરેતે ભગક્લિન્ને ક્લિન્નદ્રવે
ક્લેદય દ્રાવય અમોઘે ભગવિચ્ચે ક્ષુભ ક્ષોભય સર્વસત્ત્વાન્
ભગેશ્વરિ ઐં બ્લૂં જેં બ્લૂં ભેં બ્લૂં હેં બ્લૂં હેં
ક્લિન્ને સર્વાણિ ભગાનિ મે વશમાનય સ્ત્રીં હર બ્લેં હ્રીં
ભગ-માલિની । તારો માયા નિત્ય-ક્લિન્ને મદ-દ્રવે સ્વાહા - ઇતિ

નિત્યક્લિન્ના । પ્રણવઃ ક્રોં ભ્રોં ક્રૌં ઝ્રૌં છ્રૌં જ્રૌં સ્વાહા -
ઇતિ ભેરુણ્ડા । પ્રણવો માયા વહ્નિવાસિન્યૈ નમઃ - ઇતિ વહ્નિવાસિની ।
માયાક્લિન્ને વાક્ ક્રોં નિત્યમદદ્રવે હ્રીં - ઇતિ મહાવજ્રેશ્વરી ।
માયા શિવદૂત્યૈ નમઃ - ઇતિ શિવદૂતી । પ્રણવો માયા હું ખે ચ છે
ક્ષઃ સ્ત્રીં હું ક્ષેં હ્રીં ફટ્ - ઇતિ ત્વરિતા । કુમારી કુલસુન્દરી ।
હસકલરડવાગ્ભવહસકલરડબિન્દુમાલિની
હસકલરડચતુર્દશષોડશા- ઇતિ નિત્યા । માયા ક્લેં સ્રૂં
અઙ્કુશપાશસ્મરવાગ્ભવબ્લૂમ્પદનિત્યમદદ્રવે વર્મ
ક્લેં માયેતિ નીલપતાકા । ભમરયઊમિતિ વિજયા । સ્વૌમિતિ સર્વમઙ્ગલા ।
તારો નમો ભગવતિ જ્વાલામાલિનિ દેવદેવિ
સર્વભૂતસંહારકારિકે જાતવેદસિ જ્વલન્તિ જ્વલ જ્વલ પ્રજ્વલ
પ્રજ્વલ ત્રિજાતિયુક્તમાયારેફસપ્તકજ્વાલામાલિનિ
વર્મફડગ્નિજાયેતિ જ્વાલામાલિની ।
(અં) ચ્ક્રૌં - ઇતિ ચિત્રેતિ પઞ્ચદશ નિત્યાઃ
પ્રથમત્ર્યસ્રરેખાસ્થિતપઞ્ચદશસ્વરેષુ પૂજ્યઃ ।
વિસૃષ્ટૌ ષોડશીં મૂલવિદ્યયા ચાભ્યર્ચ્ય ॥ ૪.૯॥

મધ્યે પ્રાક્ત્ર્યસ્રમધ્યાન્તઃ મુનિવેદનાગસઙ્ખ્યાન્
યથાસમ્પ્રદાયં પાદુકાન્ દિવ્યસિદ્ધમાનવૌઘસિદ્ધાનિષ્ટ્વા
પશ્ચાત્ સ્વશિરસિ નાથં યજેત્ । એતલ્લયાઙ્ગપૂજનમ્ - ઇતિ
શિવમ્ ॥ ૪.૧૦॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
લલિતાક્રમો નામ ચતુર્થઃ ખણ્ડઃ સમાપ્તઃ ॥ ૪॥

---

## પઞ્ચમઃ ખણ્ડઃ લલિતાનવાવરણપૂજા

અથ પ્રાથમિકે ચતુરસ્રે અણિમાલઘિમામહિમેશિત્વવશિત્વ
પ્રાકામ્યભુક્તીચ્છાપ્રાપ્તિસર્વકામસિદ્ધ્યન્તાઃ મધ્યમે ચતુરસ્રે
બ્રાહ્મ્યાદ્યામહાલક્ષ્મ્યન્તાઃ તૃતીયે ચતુરસ્રે
સંક્ષોભણદ્રાવણકર્ષણવશ્યોન્માદનમહાઙ્કુશખેચરી

બીજયોનિત્રિખણ્ડાઃ સર્વપૂર્વાસ્તાઃ સમ્પૂજ્યાઃ ॥ ૫.૧॥

એતાઃ પ્રકટયોગિન્યસ્ત્રૈલોક્યમોહનચક્રે સમુદ્રાઃ સસિદ્ધયઃ
સાયુધાઃ સશક્તયઃ સવાહનાઃ સપરિવારાઃ સર્વોપચારૈઃ સમ્પૂજિતાઃ
સન્ત્વિતિ તાસામેવ સમષ્ટ્યર્ચનં કૃત્વા ॥ ૫.૨॥

કરશુદ્ધિમુચ્ચાર્ય ત્રિપુરાચક્રેશ્વરીમવમૃશ્ય દ્રામિતિ
સર્વસંક્ષોભિણીમુદ્રાં પ્રદર્શયેત્ । ચક્રયોગિનીચક્રેશીનાં
નામાનિ ભિન્નાનિ । શિષ્ટં સમાનમ્ ॥ ૫.૩॥

ષોડશપત્રે કામાકર્ષિણી નિત્યાકલેતિ નિત્યાકલાઽન્તાઃ
બુદ્ધ્યાકર્ષિણી-અહઙ્કારાકર્ષિણી-શબ્દાકર્ષિણી-સ્પર્શાકર્ષિણી-
રૂપાકર્ષિણી-રસાકર્ષિણી-ગન્ધાકર્ષિણી-ચિત્તાકર્ષિણી-
ધૈર્યાકર્ષિણી-સ્મૃત્યાકર્ષિણી-નામાકર્ષિણી-બીજાકર્ષિણી-
આત્માકર્ષિણી-અમૃતાકર્ષિણી-શરીરાકર્ષિણી-એતા
ગુપ્તયોગિન્યઃ સર્વાશાપરિપૂરકે ચક્રે સમુદ્રાઃ ઇત્યાદિ
પૂર્વવત્ આત્મરક્ષામુચ્ચાર્ય ત્રિપુરેશીમિષ્ટ્વા દ્રીં - ઇતિ
સર્વવિદ્રાવિણીં પ્રદર્શયેત્ ॥ ૫.૪॥

દિક્પત્રે કુસુમામેખલામદનામદનાતુરારેખાવેગિન્યઙ્કુશા
માલિનીરનઙ્ગપૂર્વાઃ સંમૃશ્યૈતા ગુપ્તતરયોગિન્યઃ
સર્વસંક્ષોભણચક્રે સમુદ્રાઃ ઇત્યાદિ પૂર્વવદાત્માસનમુચ્ચાર્ય
ત્રિપુરસુન્દરીમિષ્ટ્વા ક્લીમિતિ સર્વાકર્ષિણીમુદ્રાં પ્રદર્શયેત્ ॥ ૫.૫॥

ભુવનારે સંક્ષોભિણીદ્રાવિણ્યાકર્ષિણ્યાહ્લાદિનીસંમોહિનીસ્તમ્ભિની
જૃમ્ભિણીવશઙ્કરીરઞ્જન્યુન્માદિન્યર્થસાધિની-
સમ્પત્તિપૂરણી-મન્ત્રમયી-દ્વન્દ્વક્ષયઙ્કરીઃ
સર્વાદીરવમૃશ્યૈતાઃ સમ્પ્રદાયયોગિન્યઃ સર્વસૌભાગ્યદાયકચક્રે સમુદ્રાઃ
- ઇત્યાદિ મન્ત્રશેષઃ ચક્રાસનમુચ્ચાર્ય ત્રિપુરવાસિનીં
ચક્રેશ્વરીમિષ્ટ્વા બ્લૂં - ઇતિ સર્વવશઙ્કરીમુદ્રામુદ્ધાટયેત્ ॥ ૫.૬॥

બહિર્દશારે સિદ્ધિપ્રદાસમ્પત્પ્રદાપ્રિયઙ્કરીમઙ્ગલકારિણી
કામપ્રદાદુઃખવિમોચિનીમૃત્યુપ્રશમનીવિઘ્નનિવારિણ્યઙ્ગ-
સુન્દરીસૌભાગ્યદાયિનીઃ સર્વપૂર્વાઃ સમ્પૂજ્યૈતાઃ
કુલોત્તીર્ણયોગિન્યઃ સર્વાર્થસાધકચક્રે મનુશેષમુક્ત્વા

મન્ત્રાસનમુચ્ચાર્ય ત્રિપુરાશ્રીચક્રેશ્વરીં પ્રત્યવમૃશ્ય
સ ઇત્યુન્માદિનીમુદ્રાં દદ્યાત્ ॥ ૫.૭॥

અન્તર્દશારે જ્ઞાનશક્ત્યૈશ્વર્યપ્રદાજ્ઞાનમયીવ્યાધિવિનાશિન્યાધારસ્વરૂપા-
પાપહરાઽઽનન્દમયીરક્ષાસ્વરૂપિણીપ્સિતફલપ્રદાઃ
સર્વોપપદાઃ યષ્ટવ્યા એતાનિ ગર્ભયોગિન્યઃ
સર્વરક્ષાકરચક્રે શિષ્ટં તદ્વત્ સાધ્યસિદ્ધાસનમુચ્ચાર્ય
ત્રિપુરમાલિની માન્યા ક્રોમિતિ સર્વમહાઙ્કુશાં દર્શયેત્ ॥ ૫.૮॥

અષ્ટારે વશિન્યાદ્યષ્ટકં નમઃસ્થાને પૂજામન્ત્રસન્નામ એતા
રહસ્યયોગિન્યઃ સર્વરોગહરચક્રે શિષ્ટં સ્પષ્ટં મૂર્તિવિદ્યામુચ્ચાર્ય
ત્રિપુરાસિદ્ધામારાધ્ય શિવભૃગુઋદ્ધિ-યુક્ર્ક્ષે -
ઇતિ ખેચરી દેયા ॥ ૫.૯॥

બાણબીજાન્યુચ્ચાર્ય સર્વજૃમ્ભણેભ્યો બાણેભ્યો નમઃ ધં
થં સર્વસંમોહનાય ધનુષે આં હ્રીં સર્વવશીકરણાય
પાશાય ક્રોં સર્વસ્તમ્ભનાયાઙ્કુશાય નમઃ - ઇતિ
મહાત્ર્યસ્રબાહ્યચતુર્દિક્ષુ બાણાદ્યાયુધપૂજા ॥ ૫.૧૦॥

ત્રિકોણે વાક્કામશક્તિસમસ્તપૂર્વાઃ
કામેશ્વરીવજ્રેશ્વરીભગમાલિનીમહાદેવ્યઃ બિન્દૌ ચતુર્થી ॥ ૫.૧૧॥

તિસૃણામાસામનન્તરમભેદાય મૂલદેવ્યાઃ પૂજા ।
કામેશ્વર્યાદિચતુર્થી નિત્યાનાં ષોડશી ચક્રદેવીનાં નવમી
બિન્દુચક્રસ્થા ચેત્યેકૈવ । ન તત્ર મન્ત્રદેવતાભેદઃ કાર્યઃ
। તન્મહાદેવ્યા એવ । ચતુર્ષુ સ્થલેષુ વિશેષાર્ચનમાવર્તતે
॥ ૫.૧૨॥

એતા અતિરહસ્યયોગિન્યઃ સર્વસિદ્ધિપ્રદે ચક્રે । પરિશિષ્ટં
દ્રષ્ટવ્યમ્ । આવાહનીમુચ્ચાર્ય ત્રિપુરામ્બાં સમ્ભાવ્ય હ્સૌં - ઇતિ
બીજમુદ્રાકૃતિઃ ॥ ૫.૧૩॥

બિન્દુચક્રે મૂલેન દેવીમિષ્ટ્વા એષા પરાપરરહસ્યયોગિની
સર્વાનન્દમયે ચક્રે સમુદ્રા સસિદ્ધિઃ સાયુધા સશક્તિઃ સવાહના
સપરિવારા સર્વોપચારૈઃ સમ્પૂજિતાઽસ્ત્વિતિ પુનર્મૂલમુચ્ચાર્ય
મહાચક્રેશ્વરીમિષ્ટ્વા વાગ્ભવેન યોનિં પ્રદર્શ્ય ॥ ૫.૧૪॥

પૂર્વવદ્ધૂપદીપમુદ્રાતર્પણનૈવેદ્યાદિ દત્ત્વા ॥ ૫.૧૫॥

બિન્દુના મુખં બિન્દુદ્વયેન કુચૌ સપરાર્ધેન યોનિં કૃત્વા
કામકલામિતિ ધ્યાત્વા ॥ ૫.૧૬॥

સૌભાગ્યહૃદયમામૃશ્ય ॥ ૫.૧૭॥

વામભાગવિહિતત્રિકોણવૃત્તચતુરસ્રે
ગન્ધાક્ષતાર્ચિતે વાગ્ભવમુચ્ચાર્ય વ્યાપકમણ્ડલાય નમઃ
ઇત્યર્ધભક્તભરિતામ્ભસા આદિમોપાદિમમધ્યમભાજનં તત્ર ન્યસ્ય
॥ ૫.૧૮॥

પ્રણવમાયાઽન્તે સર્વવિઘ્નકૃદ્ભ્યઃ સર્વભૂતેભ્યો હું
સ્વાહા - ઇતિ ત્રિઃ પઠિત્વા બલિં દત્ત્વા ॥ ૫.૧૯॥

પ્રદક્ષિણનમસ્કારજપસ્તોત્રૈઃ સન્તોષ્ય ॥ ૫.૨૦॥

તદ્રૂપિણીમેકાં શક્તિં બાલયોપચારૈઃ સમ્પૂજ્ય તાં મપઞ્ચકેન
સન્તર્પ્ય ॥ ૫.૨૧॥

શિષ્ટૈઃ સાર્ધં ચિદગ્નૌ હવિશ્શેષં હુત્વા ॥ ૫.૨૨॥

ખેચરીં બદ્ધ્વા ક્ષમસ્વેતિ વિસૃજ્ય તામાત્મનિ
સંયોજયેત્ ઇતિ શિવમ્ ॥ ૫.૨૩॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
લલિતાનવાવરણપૂજા નામ પઞ્ચમઃ ખણ્ડઃ સમાપ્તઃ ॥ ૫॥

---

ષષ્ઠઃ ખણ્ડઃ શ્યામાક્રમઃ

ઇયમેવ મહતી વિદ્યા સિંહાસનેશ્વરી સામ્રાજ્ઞી તસ્યાઃ
પ્રધાનસચિવપદં શ્યામા તત્ક્રમવિમૃષ્ટિઃ સદા કાર્યા
॥ ૬.૧॥

પ્રધાનદ્વારા રાજપ્રસાદનં હિ ન્યાય્યમ્ ॥ ૬.૨॥

બ્રાહ્મે મુહૂર્તે ચોત્થાય શયને સ્થિત્વૈવ શ્રીપાદુકાં પ્રણમ્ય
પ્રાણાન્ આયમ્ય મૂલાદિદ્વાદશાન્તપર્યન્તં જ્વલન્તીં પરસંવિદં
વિચિન્ત્ય મનસા મૂલં ત્રિશો જપ્ત્વા બહિર્નિર્ગત્ય વિમુક્તમલમૂત્રો
દન્તધાવનજિહ્વાઘર્ષણકફવિમોચનનાસશોધન-
વિંશતિગણ્ડૂષાન્ વિધાય ॥ ૬.૩ ॥

મન્ત્રભસ્મજલસ્નાનેષ્વિષ્ટં વિધાય વસ્ત્રં પરિધાય ॥ ૬.૪ ॥

સન્ધ્યામુપાસ્ય સવિતૃમણ્ડલે દેવીં સાવરણાં વિચિન્ત્ય મૂલેન
ત્રિરર્ઘ્યં દત્ત્વા યથાશક્તિ સન્તર્પ્ય ॥ ૬.૫ ॥

યાગગૃહં પ્રવિશ્યાસને આધારશક્તિકમલાસનાય
નમ ઇત્યુપવિશ્ય ॥ ૬.૬ ॥

સમસ્તપ્રકટગુપ્તસિદ્ધયોગિનીચક્રશ્રીપાદુકાભ્યો નમ
ઇતિ શિરસ્યઞ્જલિમાધાય સ્વગુરુપાદુકાપૂજાં ચ વિધાય ॥ ૬.૭ ॥

ઐં હ્રૂઃ અસ્ત્રાય ફટ્ ઇત્યસ્ત્રમન્ત્રેણ અઙ્ગુષ્ઠાદિકનિષ્ઠાન્તં
કરતલયોઃ કૂર્પરયોઃ દેહે ચ વ્યાપકત્વેન વિન્યસ્ય ॥ ૬.૮ ॥

યં - ઇતિ વાયું પિઙ્ગલયાઽઽકૃષ્ય દેહમુપવિશોષ્ય રં -
ઇતિ વાયુમાકૃષ્ય દેહં દગ્ધ્વા વં - ઇતિ વાયુમાકૃષ્યામૃતેન
દગ્ધદેહભસ્મ સિક્ત્વા લં - ઇતિ વાયુમાકૃષ્ય દૃઢં વિધાય
હંસ - ઇતિ વાયુમાકૃષ્ય શિવચૈતન્યમુત્પાદ્ય ॥ ૬.૯ ॥

મૂલમેકશ ઉચ્ચાર્ય વાયુમાકૃષ્ય ત્રિશઃ ઉચ્ચાર્ય કુમ્ભયિત્વા
સકૃદ્ ઉચ્ચાર્ય રેચયેત્ । એવં રેચકપૂરકકુમ્ભકં ત્રિધા
સપ્તધા દશધા ષોડશધા વા વિરચ્ય તેજોમયતનુઃ ॥ ૬.૧૦ ॥

ષડઙ્ગં બાલાસહિતાં માતૃકાં મૂલહૃન્મુખેષુ
રતિપ્રીતિમનોભવાન્ વિન્યસ્ય ॥ ૬.૧૧ ॥

મૂલં સપ્તદશધા ખણ્ડયિત્વા ષટ્ બ્રહ્મબિલે ત્રીણિ લલાટે
ચત્વારિ ભ્રૂમધ્યે દક્ષવામેક્ષણયોઃ ષટ્ ચાષ્ટૌ સપ્તાસ્યે
દક્ષવામશ્રુતિકણ્ઠેષ્વેકૈકં દક્ષવામાંસયોરષ્ટૌ ચ
દશ હૃદિ દશ દક્ષવામસ્તનયોરષ્ટાવષ્ટૌ નવ નાભૌ દ્વિઃ
સ્વાધિષ્ઠાને ષડ્ આધાર એવં વિન્યસ્ય ॥ ૬.૧૨ ॥

પુનરાધારાદિબ્રહ્મબિલપર્યન્તં
સપ્તદશખણ્ડાનુક્તસ્થાનેષુ વિન્યસ્ય ॥ ૬.૧૩॥

અમૃતોદધિમધ્યરત્નદ્વીપે મુક્તામાલાદ્યલઙ્કૃતં
ચતુર્દ્વારસહિતં મણ્ડપં વિચિન્ત્ય તસ્ય
પ્રાગાદિચતુર્દ્વારેષુ -
સાં સરસ્વત્યૈ લાં લક્ષ્મ્યૈ શં શઙ્ખનિધયે પં પદ્મનિધયે નમઃ ।
લાં ઇન્દ્રાય વજ્રહસ્તાય સુરાધિપતયે ઐરાવતવાહનાય સપરિવારાય નમઃ ।
રાં અગ્નયે શક્તિહસ્તાય તેજોઽધિપતયે અજવાહનાય સપરિવારાય નમઃ ।
ટાં યમાય દણ્ડહસ્તાય પ્રેતાધિપતયે મહિષવાહનાય સપરિવારાય નમઃ ।
ક્ષાં નિરૃતયે ખડ્ગહસ્તાય રક્ષોઽધિપતયે નરવાહનાય
સપરિવારાય નમઃ ।
વાં વરુણાય પાશહસ્તાય જલાધિપતયે મકરવાહનાય સપરિવારાય નમઃ ।
યાં વાયવે ધ્વજહસ્તાય પ્રાણાધિપતયે રુરુવાહનાય સપરિવારાય નમઃ ।
સાં સોમાય શઙ્ખહસ્તાય નક્ષત્રાધિપતયે અશ્વવાહનાય સપરિવારાય નમઃ ।
હાં ઈશાનાય ત્રિશૂલહસ્તાય વિદ્યાઽધિપતયે વૃષભવાહનાય
સપરિવારાય નમઃ ।
ૐ બ્રહ્મણે પદ્મહસ્તાય સત્યલોકાધિપતયે હંસવાહનાય સપરિવારાય નમઃ ।
શ્રીં વિષ્ણવે ચક્રહસ્તાય નાગાધિપતયે ગરુડવાહનાય સપરિવારાય નમઃ ।
ૐ વાસ્તુપતયે બ્રહ્મણે નમઃ ।
ઇત્યેકાદશદિક્ષુ એકાદશદેવાનર્ચયેત્ ॥ ૬.૧૪॥

શ્યામાક્રમમન્ત્રાણામાદૌ ત્રિતારીકુમારીયોગઃ કુમારીયોગો વા
ત્રિતારી પૂર્વોક્તા કુમારી બાલા શેષમુક્તાનમ્ ॥ ૬.૧૫॥

ગન્ધદ્રવ્યેણ લિપ્તાઙ્ગસ્તામ્બૂલામોદિતવદનઃ પ્રસન્નમના ભૂત્વા
॥ ૬.૧૬॥

સુવર્ણરજતતામ્રચન્દનમણ્ડલેષુ બિન્દુત્રિકોણ
પઞ્ચકોણાષ્ટદલષોડશદલાષ્ટદલચતુર્દલ
ચતુરસ્રાત્મકં ચક્રરાજં વિલિખ્ય ॥ ૬.૧૭॥

મૂલેન ત્રિવારજપ્તેન શુદ્ધજલેન
ચતુરસ્રવૃત્તષટ્કોણત્રિકોણબિન્દૂન્ પ્રવેશેન

મત્સ્યમુદ્રયા વિધાય - અં આત્મતત્ત્વાય આધારશક્તયે વૌષટ્
ઇત્યાધારં પ્રતિષ્ઠાપ્ય ધૂમ્રાર્ચિરૂષ્મા જ્વલિની જ્વાલિની વિસ્ફુલિઙ્ગિની
સુશ્રીઃ સુરૂપા કપિલા હવ્યવાહા કવ્યવાહેત્યગ્નિકલા અભ્યર્ચ્ય
- ઉં વિદ્યાતત્ત્વાય પદ્માનનાય વૌષટ્ - ઇતિ પાત્રં પ્રતિષ્ઠાપ્ય
- તપિની તાપિની ધૂમ્રા મરીચિર્જ્વાલિની રુચિઃ સુષુમ્ના ભોગદા
વિશ્વા બોધિની ધારિણી ક્ષમા - ઇતિ પાત્રે સૂર્યકલા અભ્યર્ચ્ય -
મં શિવતત્ત્વાય સોમમણ્ડલાય નમઃ - ઇતિ શુદ્ધજલમાપૂર્ય
- અમૃતા માનદા પૂષા તુષ્ટિઃ પુષ્ટી રતિઃ ધૃતિઃ શશિની
ચન્દ્રિકા કાન્તિર્જ્યોત્સ્ના શ્રીઃ પ્રીતિરઙ્ગદા પૂર્ણા પૂર્ણામૃતા -
ચેતિ ચન્દ્રકલા અભ્યર્ચ્ય અગ્નીશાસુરવાયુષુ મધ્યે દિક્ષુ ચ
ષડઙ્ગાનિ વિન્યસ્ય અસ્ત્રેણ સંરક્ષ્ય કવચેનાવકુણ્ઠ્ય ધેનુયોની
પ્રદર્શ્ય - મૂલમન્ત્રેણ સપ્તશોઽભિમન્ત્ર્ય તજ્જલવિપ્રુડ્ભિઃ
યાગગૃહં પૂજોપકરણાનિ ચાવોક્ષ્ય ॥ ૬.૧૮॥

તાભિરીકારાઙ્કિતત્રિકોણવૃત્તચતુરસ્રં મણ્ડલં વિધાય
તસ્મિન્ પુષ્પાણિ વિકીર્ય પૂર્વવદાધારં પ્રતિષ્ઠાપ્ય અગ્નિકલા
અભ્યર્ચ્ય પાત્રં પ્રતિષ્ઠાપ્ય તસ્મિન્ પાત્રે હ્રીં ઐં મહાલક્ષ્મીશ્વરિ
પરમસ્વામિનિ ઊર્ધ્વ શૂન્યપ્રવાહિનિ સોમસૂર્યાગ્નિભક્ષિણિ
પરમાકાશભાસુરે આગચ્છાગચ્છ વિશ વિશ પાત્રં પ્રતિગૃહ્ણ
પ્રતિગૃહ્ણ હું ફટ્ સ્વાહેતિ પુષ્પાઞ્જલિં વિકીર્ય સૂર્યકલા અભ્યર્ચ્ય

બ્રહ્માણ્ડાખણ્ડસમ્ભૂતમશેષરસસમ્ભૃતમ્ ।
આપૂરિતં મહાપાત્રં પીયૂષરસમાવહ ॥

ઇત્યાદિમમાપૂર્ય દ્વિતીયં નિક્ષિપ્ય અકથાદિત્રિરેખાઙ્કિતકોણત્રયે
હલક્ષાન્ મધ્યે હંસં ચ વિલિખ્ય - મૂલેન દશધા અભિમન્ત્ર્ય
- ચન્દ્રકલાઃ અભ્યર્ચ્ય - અગ્નીશાસુરવાયુષુ મધ્યે દિક્ષુ
ષડઙ્ગાનિ વિન્યસ્ય -અસ્ત્રેણ સંરક્ષ્ય - કવચેનાવકુણ્ઠ્ય
ધેનુયોની પ્રદર્શયેત્ ॥ ૬.૧૯॥

ચક્રમધ્યે શ્રીમાતમુક્ત્વા ગીશ્વરીમૂર્તયે
નમઃ - ઇતિ મૂર્તિં કલ્પયિત્વા ભૂયઃ શ્રીમાતમુક્ત્વા
ગીશ્વર્યમૃતચૈતન્યમાવાહયામિ - ઇત્યાવાહ્ય ષોડશભિરુપચર્ય
આશુશુક્ષણિત્ર્યક્ષરક્ષઃપ્રભઞ્જનદિષુ દેવ્યા

મૌલૌ પરિતશ્ચ પૂજ્યા અઙ્ગદેવ્યઃ । તન્મન્ત્રાઃ સર્વજનાદયઃ
અષ્ટૌ સપ્તૈકાદશ દશ પુનર્દશાષ્ટાવિંશતિખણ્ડાઃ
ત્રિતારીકુમારીવાગાદયઃ સજાતયઃ સામાન્યમનુયુક્તાઃ ॥ ૬.૨૦॥

પશ્ચાદાવરણપૂજાં કુર્યાત્ ॥ ૬.૨૧॥

સર્વચક્રદેવતાઽર્ચનાનિ વામકરાઙ્ગુષ્ઠાનામિકાસન્દષ્ટ
દ્વિતીયશકલગૃહીતશ્રીપાત્રપ્રથમબિન્દુસહપતિતૈઃ
દક્ષકરાક્ષતપુષ્પક્ષેપૈઃ કુર્યાત્ ॥ ૬.૨૨॥

ત્રિકોણે રતિપ્રીતિમનોભવાન્ ॥ ૬.૨૩॥

પઞ્ચારમૂલે પુર આદિક્રમેણ દ્રાં દ્રાવણબાણાય - દ્રીં
શોષણબાણાય - ક્લીં બન્ધનબાણાય - બ્લૂં મોહનબાણાય -
સઃ ઉન્માદનબાણાય નમઃ - ઇતિ તદગ્રે માયાકામવાગ્બ્લૂં સ્ત્રીમુપજુષ્ટાઃ
કામમન્મથકન્દર્પમકરકેતનમનોભવાઃ ॥ ૬.૨૪॥

અષ્ટદલમૂલે બ્રાહ્મી-મહેશ્વરી-કૌમારી
-વૈષ્ણવી-વારાહી-માહેન્દ્રી-ચામુણ્ડા-ચણ્ડિકાઃ,
સેન્દુસ્વરયુગ્માન્ત્યાદયઃ પૂજ્યાઃ । તદગ્રે
લક્ષ્મીસરસ્વતી-રતિ-પ્રીતિ-કીર્તિ-શાન્તિ-પુષ્ટિ-તુષ્ટયઃ ॥ ૬.૨૫॥

ષોડશદલે વામા-જ્યેષ્ઠા-રૌદ્રી-શાન્તિ-શ્રદ્ધા-સરસ્વતી-
ક્રિયાશક્તિ-લક્ષ્મી-સૃષ્ટિ-મોહિની-પ્રમથિની-
આશ્વાસિની-વીચી-વિદ્યુન્માલિની-સુરાનન્દા-નાગબુદ્ધિકાઃ ॥ ૬.૨૬॥

અષ્ટદલે અસિતાઙ્ગ-રુરુ-ચણ્ડ-ક્રોધન-ઉન્મત્ત-કપાલ-ભીષણ-
સંહારાઃ સદણ્ડિસ્વરયુગ્માદિસંયુક્તા ભૈરવાન્તાશ્ચ ભાવનીયાઃ ॥ ૬.૨૭॥

ચતુર્દલં માયુક્તતઙ્ગી સિદ્ધલક્ષ્મીશ્ચ
મહામાયુક્તતઙ્ગી મહાસિદ્ધલક્ષ્મીશ્ચ ॥ ૬.૨૮॥

ગં ગણપતિ - દું દુર્ગા - બં બટુક - ક્ષં ક્ષેત્રપાલાઃ
ચતુરસ્રે સમ્પૂજ્યાઃ ॥ ૬.૨૯॥

સાં સરસ્વત્યૈ નમઃ ઇતિપ્રભૃતિ વાસ્તુપતયે બ્રહ્મણે નમઃ
ઇતિપર્યન્તં પુનસ્તત્રૈવાભ્યર્ચ્ય ॥ ૬.૩૦॥

હંસમૂર્તિપરપ્રકાશપૂર્ણનિત્યકરુણસમ્પ્રદાય
ગુરૂંશ્ચતુરસ્રપૂર્વરેખાયામભ્યર્ચ્ય ॥ ૬.૩૧॥

સ્વશિરસિ સામાન્યવિશેષપાદુકે અભ્યર્ચયેત્ ॥ ૬.૩૨॥

પુનર્દેવીમભ્યર્ચ્ય બાલયા ષોડશોપચારાન્ વિધાય ॥ ૬.૩૩॥

શુદ્ધજલેન ત્રિકોણવૃત્તચતુરસ્રં
વિધાયાર્ધાન્નપૂર્ણસલિલં સાદિમોપાદિમમધ્યમં
સુ[સ]ગન્ધપુષ્પં સાધારં પાત્રં નિધાય ॥ ૬.૩૪॥

શ્રીમાતમુક્ત્વા ગીશ્વરીમં બલિં ગૃહ્ણ ગૃહ્ણ
હું ફટ્ સ્વાહા શ્રીમાતમુક્ત્વા ગીશ્વરિ શરણાગતં
માં ત્રાહિ ત્રાહિ હું ફટ્ સ્વાહા ક્ષેત્રપાલનાથેમં
બલિં ગૃહ્ણ ગૃહ્ણ ફટ્ સ્વાહા - ઇતિ મન્ત્રત્રયેણ
વામપાર્ષ્ણિઘાતકરાસ્ફોટસમુદઞ્ચિતવક્ત્રનારાચમુદ્રાભિઃ
બલિં પ્રદાય ॥ ૬.૩૫॥

શ્યામલાં શક્તિમાહૂય બાલયા તામભ્યર્ચ્ય તસ્યા હસ્ત આદિમોપાદિમૌ
દત્ત્વા તત્ત્વં શોધયિત્વા તચ્છેષમુરરીકૃત્ય યોગ્યૈઃ સહ
હવિશ્શેષં સ્વીકુર્યાત્ ॥ ૬.૩૬॥

એવં નિત્યસપર્યાં કુર્વન્ લક્ષજપં જપ્ત્વા તદ્દશાંશક્રમેણ
ચ હોમતર્પણબ્રાહ્મણભોજનાનિ વિદધ્યાત્ ॥ ૬.૩૭॥

એતન્મનુજાપી ન કદમ્બં છિન્દ્યાત્ ગિરા કાલીતિ ન વદેત્
વીણાવેણુનર્તનગાયનગાથાગોષ્ઠીષુ ન પરાઙ્મુખો ગચ્છેત્
ગાયકં ન નિન્દ્યાત્ ॥ ૬.૩૮॥

લલિતોપાસકો નેક્ષુખણ્ડં ભક્ષયેત્
ન દિવા સ્મરેદ્ વાર્તાલીં - ન જુગુપ્સેત સિદ્ધદ્રવ્યાણિ -
ન કુર્યાત્ સ્ત્રીષુ નિષ્ઠુરતાં - વીરસ્ત્રિયં ન ગચ્છેત્ -
ન તં હન્યાત્ - ન તદ્દ્રવ્યમપહરેત્ -
નાત્મેચ્છયામપઞ્ચકમુરરી કુર્યાત્ કુલભ્રષ્ટૈઃ સહ નાસીત્
- ન બહુ પ્રલપેત્ - યોષિતં સમ્ભાષમાણામપ્રતિસમ્ભાષમાણો ન
ગચ્છેત્ - કુલપુસ્તકાનિ ગોપાયેત્ - ઇતિ શિવમ્ ॥ ૬.૩૯॥

॥ ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
શ્યામાક્રમોપ નામ ષષ્ઠઃ ખણ્ડઃ સમાપ્તઃ ॥ ૬॥

---

સપ્તમઃ ખણ્ડઃ વારાહીક્રમઃ

ઇત્થં સાઙ્ગાં સઙ્ગીતમાતૃકામિષ્ટ્વા
સંવિત્સામ્રાજ્ઞીસિંહાસનાધિરૂઢાયા
લલિતાયા મહારાજ્ઞ્યા દણ્ડનાયિકાસ્થાનીયાં
દુષ્ટનિગ્રહશિષ્ટાનુગ્રહનિરર્ગલાજ્ઞાચક્રાં સમયસઙ્કેતાં
કોલમુખીં વિધિવદ્વરિવસ્યેત્ ॥ ૭.૧॥

તત્રાયં ક્રમો મહારાત્રે બુદ્ધ્વા સ્વહૃદયપરમાકાશે ધ્વનન્તમ્
અનાહતધ્વનિમૂર્જિતાનન્દદાયકમવમૃશ્ય ॥ ૭.૨॥

શિવાદિશ્રીગુરુભ્યો નમઃ - ઇતિ મૂર્ધ્નિ બધ્નીયાદઞ્જલિમ્ ॥ ૭.૩॥

વાચમુચ્ચાર્ય ગ્લૌમ્ - ઇતિ ચ પદ્ધતાવસ્યાં સર્વે મનવો જપ્યાઃ ॥ ૭.૪॥

મૂલાદિષણ્મન્ત્રૈઃ યથામન્ત્રં લિઙ્ગદેહં શોધયેત્ ॥ ૭.૫॥

મૂલશૃઙ્ગાટકાત્ સુષુમ્નાપથેન જીવશિવં પરશિવે
યોજયામિ સ્વાહા - યં સઙ્કોચશરીરં શોષય શોષય સ્વાહા
- રં સઙ્કોચશરીરં દહ દહ પચ પચ સ્વાહા - વં
પરમશિવામૃતં વર્ષય વર્ષય સ્વાહા -
લં શામ્ભવશરીરમુત્પાદયોત્પાદય સ્વાહા -
હંસઃ સોઽહમવતરાવતર શિવપદાત્ જીવ
સુષુમ્નાપથેન પ્રવિશ મૂલશૃઙ્ગાટકમુલ્લસોલ્લસ જ્વલ જ્વલ
પ્રજ્વલ પ્રજ્વલ હંસઃ સોઽહં સ્વાહા - ઇતિ ભૂતશુદ્ધિં વિધાય
॥ ૭.૬॥

માતૃકાસમ્પુટિતાં દ્વિતારીં કાનનવૃત્તદ્વ્યક્ષિશ્રુતિ
નાસાગણ્ડોષ્ઠદન્તમૂર્ધાસ્યદોઃ પત્સન્ધ્યગ્રપાર્શ્વ-
દ્વયપૃષ્ઠનાભિજઠરહૃદ્દોર્મૂલાપરગલ

કક્ષહૃદાદિપાણિપાદયુગલજઠરાનનેષુ વિન્યસ્ય ॥ ૭.૭॥

અન્ધે પ્રભૃતિ સપ્તાર્ણપઞ્ચકમઙ્ગુષ્ઠાદિકનિષ્ઠાન્તમ્ ॥ ૭.૮॥

વાઙ્નમો ભગવતીત્યારભ્ય ત્રયોદશભિર્હૃદયં ષડ્ભિઃ શિરઃ -
દશભિઃ શિખાં, સપ્તભિઃ સપ્તભિઃ સપ્તભિઃ કવચનેત્રાસ્ત્રાણિ
વિન્યસ્ય ॥ ૭.૯॥

ગન્ધાદિભિરલઙ્કૃત્ય અર્ઘ્યં શોધયેત્ ॥ ૭.૧૦॥

આત્મનોઽગ્રભાગે ગોમયેન વિલિપ્તે હેતુમિશ્રિતજલેન
ચતુરસ્રં વર્તુલં ષટ્કોણં ત્રિકોણમન્તરાન્તરં - વિલિખ્ય -
અર્ઘ્યશોધનમનુભિઃ શ્યામાક્રમોક્તૈઃ આધારાર્ઘ્યપાત્રાણિ
સંશોધ્ય - સામાન્યેનાભ્યર્ચ્ય - તદર્ઘ્યં વષડિત્યુદ્ધૃત્ય -
સ્વાહેતિ સંસ્થાપ્ય હું - ઇત્યવકુણ્ઠ્ય - વૌષટ્ ઇત્યમૃતીકૃત્ય
ફડિતિ સંરક્ષ્ય - નમઃ - ઇતિ પુષ્પં નિક્ષિપ્ય મૂલેન નિરીક્ષ્ય
તત્પૃષતૈઃ પાવયિત્વા સપર્યાવસ્તૂનિ ॥ ૭.૧૧॥

(૧) શિરોવદનહૃદ્ગુહ્યપાદેષુ પૂર્વોક્તસપ્તકપઞ્ચકં વિન્યસ્ય
(૨) વિદ્યામષ્ટધા ખણ્ડયિત્વા પાદાદિજાનુ-જાન્વાદિકટિ-કટ્યાદિનાભિ-નાભ્યાદિ
હૃદય - હૃદયાદિકણ્ઠ - કણ્ઠાદિભ્રૂમધ્ય - ભ્રૂમધ્યાદિલલાટ -
લલાટાદિમૌલિષુ એકત્રિંશત્ સપ્ત સપ્ત સપ્ત
સપ્ત સપ્ત પઞ્ચત્રિંશદેકાદશાર્ણખણ્ડાન્
(૩) માતૃકાસ્થાનેષુ મૂલમનુપદાનિ ચ ન્યસ્ય ॥ ૭.૧૨॥

પૂર્વોક્તાનષ્ટખણ્ડાનેકૈકશ ઉચ્ચાર્ય પૂર્વોક્તેષુ સ્થાનેષુ હ્લાં
શર્વાય ક્ષિતિતત્ત્વાધિપતયે - હ્લીં ભવાય અમ્બુ-તત્ત્વાધિપતયે હ્લૂં
રુદ્રાય વહ્નિ તત્ત્વાધિપતયે - હ્લૈં ઉગ્રાય વાયુતત્ત્વાધિપતયે હ્લૌં
ઈશાનાય ભાનુ-તત્ત્વાધિપતયે સોં મહાદેવાય સોમતત્ત્વાધિપતયે હં
મહાદેવાય યજમાનતત્ત્વાધિપતયે ઔં ભીમાય આકાશતત્ત્વાધિપતયે
નમઃ - ઇતિ તત્ત્વન્યાસઃ ॥ ૭.૧૩॥

મૂલેન સર્વેણ વ્યાપકં કૃત્વા દેવીં ધ્યાત્વા ॥ ૭.૧૪॥

પુરતઃ પટપટ્ટસુવર્ણરજતતામ્રચન્દનપીઠાદિનિર્મિતં
દૃષ્ટિમનોહરં

ચતુરસ્રત્રય-સહસ્રપત્ર-શતપત્રાષ્ટપત્ર-ષડસ્ર
પઞ્ચાસ્રત્ર્યસ્ર-બિન્દુલક્ષણં કોલમુખીચક્રં વિરચ્ય ॥ ૭.૧૫॥

તત્ર કુસુમાઞ્જલિં વિકીર્ય સ્વર્ણપ્રાકારાય સુધાऽબ્ધયે
વરાહદ્વીપાય વરાહપીઠાય નમઃ ઇતિ । આં -આધારશક્તયે કું
કૂર્માય કં કન્દાય અં -અનન્તનાલાય નમઃ - ઇતિ ચ ધર્માદિભિઃ
સહ ષોડશમન્ત્રૈઃ પીઠે અભ્યર્ચ્ય ॥ ૭.૧૬॥

ત્રિપઞ્ચષડરદલાષ્ટકશતસહસ્રારપદ્માસનાય નમઃ
- ઇતિ ચક્રમનુના ચક્રમિષ્ટ્વા ॥ ૭.૧૭॥

વહ્નિમણ્ડલાય સૂર્યમણ્ડલાય સોમમણ્ડલાય નમઃ - ઇતિ ત્રયો
ગુણમન્ત્રાઃ -આત્મમન્ત્રાઃ ચત્વારઃ - ઇતિ સપ્તવિંશતિકમિદં
પીઠે વરિવસનીયમ્ ॥ ૭.૧૮॥

હ્રૌં પ્રેતપદ્માસનાય સદાશિવાય નમઃ - ઇતિ ચક્રોપરિ
દેવ્યાસનવિમૃષ્ટિઃ ॥ ૭.૧૯॥

ૡ ષા ઈ વારાહીમૂર્તયે ઠઃ ઠઃ ઠઃ ઠઃ હું ફટ્ - ઇતિ
વાગ્લૌમાદિ ગ્લૌંવાગન્તા મૂર્તિકરણી વિદ્યા ॥ ૭.૨૦॥

મૂલવિદ્યયા આવાહનસંસ્થાપનસંનિધાપનસંનિરોધન
સમ્મુખી કરણાવકુણ્ઠનવન્દનધેનુયોનીર્બદ્ધ્વા ॥ ૭.૨૧॥

દેવ્યઙ્ગન્યસ્તષડઙ્ગપઞ્ચાઙ્ગઃ ॥ ૭.૨૨॥

પાદ્યાર્ઘ્યાચમનીયસ્નાનવાસોગન્ધપુષ્પધૂપદીપનીરાજન
છત્રચામરદર્પણરક્ષાચમનીયનૈવેદ્યપાનીયતામ્બૂલાખ્ય
ષોડશોપચારક્લૃપ્યન્તે ॥ ૭.૨૩॥

ધ્યાનં દેવ્યાઃ મેઘમેચકા
કુટિલદંષ્ટ્રા કપિલનયના ઘનસ્તનમણ્ડલા
ચક્રખડ્ગમુસલાભયશઙ્ખખેટહલવરપાણિઃ પદ્માસીના
વાર્તાલી ધ્યેયા ॥ ૭.૨૪॥

દશધા તસ્યાસ્તર્પણં કુર્યાત્ ॥ ૭.૨૫॥

ત્ર્યસ્રે જમ્ભિનીમોહિનીસ્તમ્ભિન્યઃ ॥ ૭.૨૬॥

પઞ્ચારે અગ્નિનીરુન્ધિન્યૌ તાશ્ચ ॥ ૭.૨૭॥

ષટ્કોણે આક્ષાઈ બ્રહ્માણી ઈલાઈ માહેશ્વરી ઊહાઈ કૌમારી ૠસાઈ
વૈષ્ણવી ઐશાઈ ઇન્દ્રાણી ઔવાઈ ચામુણ્ડા તસ્યૈવાગ્રેષુ મધ્યે
ચ યમરયૂં યાં યીં યૂં યૈં યૌં યઃ યાકિનિ જમ્ભય જમ્ભય
મમ સર્વશત્રૂણાં ત્વગ્ધાતું ગૃહ્ણ ગૃહ્ણ અણિમાઽઽદિવશં
કુરુ કુરુ સ્વાહેતિ । અન્યાસાં ધાતુનાથાનામપ્યેવં બીજે નામનિ
ધાતૌ ત્વારાધનકર્મણિ મન્ત્રસન્નામઃ ।
રમરયૂં રાકિણિ રક્તધાતું
પિબ પિબ લમરયૂં લાકિનિ માંસધાતું ભક્ષય ભક્ષય
ડમરયૂં ડાકિનિ મેદોધાતું ગ્રસ ગ્રસ કમરયૂં કાકિનિ
અસ્થિધાતું જમ્ભય જમ્ભય સમરયૂં સાકિનિ મજ્જાધાતું
ગૃહ્ણ ગૃહ્ણ હમરયૂં હાકિનિ શુક્રધાતું પિબ પિબ
અણિમાઽઽદિવશં કુરુ કુરુ સ્વાહા - ઇતિ ધાતુનાથયજનમ્ ॥ ૭.૨૮॥

અનન્તરં ષડસ્રોભયપાર્શ્વયોઃ ક્રોધિનીસ્તમ્ભિન્યૌ
ચામરગ્રાહિણ્યૌ તત્રૈવ સ્તમ્ભનમુસલાયુધાય
આકર્ષણહલાયુધાય નમઃ ષડરાદ્બહિઃ પુરતો દેવ્યાઃ ક્ષ્રૌં
ક્ષ્રૌં ચણ્ડોચ્ચણ્ડાય નમઃ - ઇતિ તદ્યજનમ્ ॥ ૭.૨૯॥

અષ્ટદલે વાર્તાલીવારાહીવરાહમુખ્યન્ધિન્યાદયઃ પઞ્ચ
તદ્બહિઃ મહામહિષાય દેવીવાહનાય નમઃ ॥ ૭.૩૦॥

(૧) શતારે દેવીપુરતો દલસન્ધૌ જમ્ભિન્યા ઇન્દ્રાયાપ્સરોભ્યઃ
સિદ્ધેભ્યો દ્વાદશાદિત્યેભ્યોઽગ્નયે સાધ્યેભ્યો વિશ્વેભ્યો દેવેભ્યો
વિશ્વકર્મણે યમાય માતૃભ્યો રુદ્રપરિચારકેભ્યો રુદ્રેભ્યો
મોહિન્યૈ નિરૃતયે રાક્ષસેભ્યો મિત્રેભ્યો ગન્ધર્વેભ્યો ભૂતગણેભ્યો
વરુણાય વસુભ્યો વિદ્યાધરેભ્યઃ કિન્નરેભ્યો વાયવે સ્તમ્ભિન્યૈ
ચિત્રરથાય તુમ્બુરવે નારદાય યક્ષેભ્યઃ સોમાય કુબેરાય દેવેભ્યો
વિષ્ણવે ઈશાનાય બ્રહ્મણે અશ્વિભ્યાં ધન્વન્તરયે વિનાયકેભ્યો નમઃ -
ઇતિ દેવતામણ્ડલમિષ્ટ્વા (૨) તદ્બહિઃ ઔં ક્ષૌં ક્ષેત્રપાલાય
નમઃ સિંહવરાય દેવીવાહનાય નમઃ - ઇતિ ચ તદુભયં
વરિવસ્યેત્ । તદ્બહિઃ મહાકૃષ્ણાય મૃગરાજાય દેવીવાહનાય
નમઃ - ઇતિ તત્પૂજા ॥ ૭.૩૧॥

(૧) સહસ્રારે અષ્ટધા વિભક્તે ઐરાવતાય પુણ્ડરીકાય વામનાય
કુમુદાયાઞ્જનાય પુષ્પદન્તાય સાર્વભૌમાય સુપ્રતીકાય નમઃ - ઇતિ
તત્પૂજા બહિઃ સુધાઽબ્ધેર્વા । (૨) બાહ્યપ્રાકારાષ્ટદિક્ષુ અધ
ઉપરિ ચ હેતુકાદયઃ - ભૈરવક્ષેત્રપાલશબ્દયુક્તાઃ
પ્રત્યેકં ક્ષૌમાદયશ્ચ યષ્ટવ્યાઃ ।
હેતુકત્રિપુરાન્તકાગ્નિયમજિહ્વૈકપાદકાલકરાલભીમરૂપ
હાટકેશાચલાઃ દશ ભૈરવાઃ ॥ ૭.૩૨॥

એવં ષડાવરણીમિષ્ટ્વા પુનર્દેવીં ત્રિધા સન્તર્પ્ય
સર્વૈરુપચારૈરુપચર્ય ॥ ૭.૩૩॥

પુરતો વામભાગે હસ્તમાત્રં જલેનોપલિપ્ય
રુધિરાન્નહરિદ્રાઽન્નમહિષપલસક્તુશર્કરાહેતુ
ફલત્રયમાક્ષિકમુદ્ગત્રયમાષચૂર્ણદધિક્ષીરઘૃતૈઃ
શુદ્ધોદનં સમ્મર્દ્ય ચરણાયુધાણ્ડપ્રમાણાન્ દશપિણ્ડાન્ વિધાય
તત્ર નિધાય કપિત્થફલમાનમેકં પિણ્ડં ચ તત્સમીપે
સાદિમોપાદિમમધ્યમં ચષકં ચ નિક્ષિપ્ય દશપિણ્ડાન્ હેતુકાદિભ્યો
મધ્યમપિણ્ડં ચષકં ચ ચણ્ડોચ્ચણ્ડાય તત્તન્મન્ત્રૈઃ દત્વા
વૃન્દમારાધ્ય ॥ ૭.૩૪॥

યથાવિભવં શ્રીગુરું સન્તોષ્ય ॥ ૭.૩૫॥

સમ્પૂર્ણયૌવનાઃ સલક્ષણામદનોન્માદિનીસ્તિસ્રઃ શક્તીરાહૂય
બટુકં ચૈકમભ્યર્ચ્ય સ્નપયિત્વા ગન્ધાદિભિરલઙ્કૃત્ય
વાર્તાલીબુદ્ધ્યા એકાં શક્તિં મધ્યે ક્રોધિનીસ્તમ્ભિનીબુદ્ધ્યા દ્વે
ઇતરે પાર્શ્વયોશ્ચણ્ડોચ્ચણ્ડધિયા બટુકમગ્રે સ્થાપયિત્વા
સર્વૈર્દ્રવ્યૈઃ સન્તોષ્ય મમ શ્રીવાર્તાલીમન્ત્રસિદ્ધિર્ભૂયાદિતિ તાઃ
પ્રતિવદેત્ તાશ્ચ પ્રસીદન્ત્વધિદેવતાઃ - ઇતિ બ્રૂયુઃ ॥ ૭.૩૬॥

એવં સપરિવારામુદારાં ભૂદારવદનામુપતોષ્ય લક્ષં
પુરશ્ચરણં કૃત્વા તદ્દશાંશં તાપિચ્છકુસુમૈર્હુત્વા મન્ત્રં
સાધયેત્ ॥ ૭.૩૭॥

તતશ્ચ પૂજિતાં દેવીમાત્મનિ યોજયિત્વા સ્વૈરં વિહરન્નાજ્ઞાસિદ્ધઃ

સુખી વિહરેત્ - ઇતિ શિવમ્ ॥ ૭.૩૮॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
વારાહીક્રમો નામ સપ્તમઃ ખણ્ડઃ સમાપ્તઃ ॥ ૭॥

---

અષ્ટમઃ ખણ્ડઃ પરાક્રમઃ

ઇતિ વિધિવત્કૃતવાર્તાલીવરિવસ્યઃ સિંહાસનવિદ્યાહૃદયમુનુત્તરં
પરાબીજરૂપં ધામ તત્ક્રમપૂર્વં વિમૃશેત્ ॥ ૮.૧॥

પ્રભુહૃદયજ્ઞાતુઃ પદે પદે સુખાનિ ભવન્તિ ॥ ૮.૨॥

અથોઽનુત્તરપદ્ધતિં વ્યાખ્યાસ્યામઃ ॥ ૮.૩॥

કલ્યે સમુત્થાય બ્રહ્મકોટરવર્તિનિ
સહસ્રદલકમલે સન્નિવિષ્ટાયાઃ સૌવર્ણરૂપાયાઃ
પરાયાશ્ચરણયુગલવિગલદમૃતરસવિસરપરિપ્લુતં
વપુઃ ધ્યાત્વા ॥ ૮.૪॥

સ્નાતઃ શુચિવાસોવસાનઃ સૌઃ વર્ણેન ત્રિરાચમ્ય દ્વિઃ
પરિમૃજ્ય સકૃદ્ ઉપસ્પૃશ્ય ચક્ષુષી નાસિકે શ્રોત્રે અંસે
નાભિં હૃદયં શિરશ્ચાવમૃશ્ય એવં ત્રિરાચમ્ય ॥ ૮.૫॥

ઊર્ણામૃદુશુચિતમમાસનં સૌવર્ણસૂર્યજપાભિમન્ત્રિતં
મૂલમન્ત્રોક્ષિતમધિષ્ઠાય ॥ ૮.૬॥

ઉદગ્વદનો મૌની ભૂષિતવિગ્રહો મૂલપૂર્વેણ દેશિકમનુના
મસ્તકે દેશિકમિષ્ટ્વા ॥ ૮.૭॥

વામપાર્ષ્ણિઘાતૈઃ છોટિકાત્રયેણ પાતાલાદિગતાન્ ભેદાવભાસિનઃ
વિઘ્નાનુત્સાર્ય ॥ ૮.૮॥

શિરોમુખહૃન્મૂલસર્વાઙ્ગેષુ મૂલં વિન્યસ્ય ॥ ૮.૯॥

કાકચઞ્ચૂપુટાકૃતિના મુખેન સઞ્ચોષ્યાનિલં સપ્તવિંશતિશો મૂલં
જપ્ત્વા વેદ્યં નાભૌ સંમુદ્ય પુનઃ સપ્તવિંશતિશો જપ્ત્વા અઙ્ગુષ્ઠેન

શિખાં બધ્વા પુનરનિલમાપૂર્ય તેન મૂલે ચિદગ્નિમુત્થાપ્ય તત્ર
વેદ્યસ્ય વિલયં વિભાવ્ય ॥ ૮.૧૦॥

ગોમયેનોપલિપ્તચતુરસ્રભૂતલે
પ્રવહત્પાર્શ્વકરકૃતયા મત્સ્યમુદ્રયા દિવ્યગન્ધામ્બુયુતયા
ભૂવ્યોમવાયુવહ્નિમણ્ડલાનિ કૃત્વા ॥ ૮.૧૧॥

શ્યામાવત્ સામાન્યવિશેષાર્ઘ્યે સાદયેત્ ॥ ૮.૧૨॥

સર્વેઽપિ પરાક્રમમનવઃ સૌઃ વર્ણપૂર્વાઃ કાર્યાઃ ॥ ૮.૧૩॥

ભૃગુચતુર્દશષોડશદ્વિરાવૃત્યા વર્ણષડઙ્ગં
સર્વમૂલષડાવૃત્યા મન્ત્રષડઙ્ગં ચ કૃત્વા ॥ ૮.૧૪॥

ઉભાભ્યામર્ચયિત્વા ॥ ૮.૧૫॥

મૂલમુચ્ચાર્ય તાં ચિન્મયીમાનન્દલક્ષણામ્
અમૃતકલશપિશિતહસ્તદ્વયાં પ્રસન્નાં દેવીં પૂજયામિ નમઃ
સ્વાહા - ઇતિ સુધાદેવીમભ્યર્ચ્ય તયા સમ્પ્રોક્ષ્ય વરિવસ્યાવસ્તૂનિ
॥ ૮.૧૬॥

પૂર્વં નાભૌ સમ્મુદ્રિતં ચિદગ્નિવિલીનં તમાયોદ્રવવત્
ષટ્ત્રિંશત્તત્ત્વકદમ્બકં હૃત્સરોજે સમાનીય ॥ ૮.૧૭॥

મૂલજપ્તૈઃ કુસુમક્ષેપૈઃ વક્ષ્યમાણૈશ્ચ મન્ત્રૈરાસનક્લૃપ્તિં
કુર્યાત્ - મૂલાદિ-યોગ-પીઠાય નમઃ - ઇત્યન્તાનિ તાનિ ચ
પૃથિવ્યપ્તેજોવાય્વાકાશગન્ધરસરૂપસ્પર્શ
શબ્દોપસ્થપાયુપાદપાણિવાગ્ઘ્રાણજિહ્વાચક્ષુસ્ત્વક્શ્રોત્રા
હઙ્કારબુદ્ધિમનઃપ્રકૃતિપુરુષનિયતિકાલ
રાગકલાવિદ્યામાયાશુદ્ધવિદ્યેશ્વરસદાશિવશક્તિશિવાઃ
। એવં પરાચક્રં કૃત્વા ॥ ૮.૧૮॥

તત્રૈતદૈક્યવિમર્શરૂપિણીં ષોડશકલાં પરાં દેવીમાવાહ્ય
॥ ૮.૧૯॥

અકલઙ્કશશાઙ્કાભા ત્ર્યક્ષા ચન્દ્રકલાવતી ।
મુદ્રાપુસ્તલસદ્બાહુઃ પાતુ માં પરમા કલા ॥

ઇતિ ધ્યાત્વા ॥ ૮.૨૦॥

મૂલાદિમુચ્ચાર્ય પ્રકાશરૂપિણી પરાભટ્ટારિકા
મૂલમધ્યમુચ્ચાર્ય વિમર્શરૂપિણી પરાભટ્ટારિકા
મૂલાન્ત્યમુચ્ચાર્ય પ્રકાશવિમર્શરૂપિણી પરાભટ્ટારિકેતિ
ત્રિભિઃ દેવ્યા મૂલહૃન્મુખેષ્વભ્યર્ચ્ય સમસ્તમુચ્ચાર્ય
મહાપ્રકાશવિમર્શરૂપિણી પરાભટ્ટારિકેતિ દશવારમવમૃશ્ય
તામેવ દેવીં કાલાગ્નિકોટિદીપ્તાં ધ્યાત્વા ॥ ૮.૨૧॥

તસ્યાં ક્રિયાસમભિવ્યાહારેણ વેદ્યમખિલં હુત્વા ॥ ૮.૨૨॥

મૂલમુચ્ચાર્ય સામાન્યપાદુકયા સ્વમસ્તકસ્થાય ગુરવે અર્ઘ્યં
નિવેદ્ય ॥ ૮.૨૩॥

પુનશ્ચિદગ્નિમુદ્દીપ્તં વિભાવ્ય ॥ ૮.૨૪॥

દિવ્યૌઘં તિસ્રઃ પાદુકાઃ સિદ્ધૌઘં તિસ્રઃ માનવૌઘમષ્ટાવભ્યર્ચ્ય
॥ ૮.૨૫॥

પરાભટ્ટારિકાઽઘોરશ્રીકણ્ઠશક્તિધરક્રોધત્ર્યમ્બકાનન્દ
પ્રતિભાદેવ્યમ્બા વીરસંવિદાનન્દમધુરાદેવ્યમ્બા
જ્ઞાનશ્રીરામયોગાઃ - ઇતિ પરાક્રમપાદુકાઃ ॥ ૮.૨૬॥

તતઃ કલામનુના બલિં નિવેદ્ય ॥ ૮.૨૭॥

હવિશ્શેષમાત્મસાત્કુર્યાત્ । ઇતિ શિવમ્ ॥ ૮.૨૮॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
પરાક્રમો નામાષ્ટમઃ ખણ્ડઃ સમાપ્તઃ ॥ ૮॥

---

નવમઃ ખણ્ડઃ હોમવિધિઃ

અથ સ્વેષ્ટમન્ત્રસ્ય હોમવિધાનં વ્યાખ્યાસ્યામઃ ॥ ૯.૧॥

ચતુરસ્રં કુણ્ડમથવા હસ્તાયામમઙ્ગુષ્ઠોન્નતં સ્થણ્ડિલં
કૃત્વા ॥ ૯.૨॥

સામાન્યાર્ઘ્યમુપશોધ્ય તેનાવોક્ષ્ય ॥ ૯.૩॥

પ્રાચીરુદીચીસ્તિસ્રસ્તિસ્રો રેખા લિખિત્વા ॥ ૯.૪॥

તાસુ રેખાસુ બ્રહ્મયમસોમરુદ્રવિષ્ણિવન્દ્રાન્
ષટ્તારીનમસ્સમ્પુટિતાનભ્યર્ચ્ય ॥ ૯.૫॥

સહસ્રાર્ચિષે હૃદયાય નમઃ સ્વસ્તિપૂર્ણાય શિરસે સ્વાહા ઉત્તિષ્ઠ
પુરુષાય શિખાયૈ વષટ્ ધૂમવ્યાપિને કવચાય હું સપ્તજિહ્વાય
નેત્રત્રયાય વૌષટ્ ધનુર્ધરાય અસ્ત્રાય ફટ્ - ઇતિ ષડઙ્ગં
વિધાય તેન ષડઙ્ગેન કુણ્ડમભ્યર્ચ્ય ॥ ૯.૬॥

તત્રાષ્ટકોણષટ્કોણત્રિકોણાત્મકં અગ્નિચક્રં
વિલિખ્ય પીતાયૈ શ્વેતાયૈ અરુણાયૈ કૃષ્ણાયૈ ધૂમ્રાયૈ તીવ્રાયૈ
સ્ફુલિઙ્ગિન્યૈ રુચિરાયૈ જ્વાલિન્યૈ નમ - ઇતિ ત્રિકોણમધ્યે વહ્નેઃ
પીઠશક્તીઃ સમ્પૂજ્ય - તં તમસે રં રજસે સં સત્ત્વાય આમ્
આત્મને અમ્ અન્તરાત્મને પં પરમાત્મને હ્રીં જ્ઞાનાત્મને નમઃ -
ઇતિ તત્રૈવાભ્યર્ચયેત્ ॥ ૯.૭॥

તતો જનિષ્યમાણવહ્નેઃ પિતરૌ વાગીશ્વરીવગીશ્વરૌ
પીઠેઽભ્યર્ચ્ય તયોર્મિથુનીભાવં ભાવયિત્વા હ્રીં
વાગીશ્વરીવાગીશ્વરાભ્યાં નમઃ - ઇતિ ધ્યાત્વા ॥ ૯.૮॥

અરણેઃ સૂર્યકાન્તાત્ દ્વિજગૃહાદ્વા વહ્નિમુત્પાદ્ય
મૃત્પાત્રે તામ્રપાત્રે વા આગ્નેય્યામૈશાન્યાં નૈરૃત્યાં
વા નિધાય અગ્નિશકલં ક્રાવ્યાદાંશં નૈરૃત્યાં વિસાર્ય
નિરીક્ષણપ્રોક્ષણતાડનાવકુણ્ઠનાદિભિઃ વિશોધ્ય ૐ
વૈશ્વાનર જાતવેદ ઇહાવહ લોહિતાક્ષ સર્વકર્માણિ સાધય સ્વાહા
- ઇતિ મૂલાધારોદ્ધૃતસંવિદં લલાટનેત્રદ્વારા નિર્ગમય્ય તં
બાહ્યાગ્નિયુક્તં પાતયેત્ ॥ ૯.૯॥

કવચમન્ત્રેણ ઇન્ધનૈરાચ્છાદ્ય ॥ ૯.૧૦॥

અગ્નિં પ્રજ્વલિતં વન્દે જાતવેદં હુતાશનમ્ ।
સુવર્ણવર્ણમનલં સમિદ્ધં વિશ્વતોમુખમ્ ॥

ઇત્યુપસ્થાય ॥ ૯.૧૧॥

ઉત્તિષ્ઠ હરિતપિઙ્ગલ લોહિતાક્ષ સર્વકર્માણિ સાધય મે દેહિ
દાપય સ્વાહા - ઇતિ વહ્નિમુત્થાપ્ય ॥ ૯.૧૨॥

ચિત્પિઙ્ગલ હન હન દહ દહ પચ પચ સર્વજ્ઞાજ્ઞાપય સ્વાહા
ઇતિ પ્રજ્વાલ્ય ॥ ૯.૧૩॥

ષટ્તારવાચો નમોમન્ત્રેણ પુંસવનસીમન્તજાતકર્મ
નામકરણાન્નપ્રાશનચૌલોપનયનગોદાનવિવાહ
કર્માણ્યમુકાગ્નેરમુકં કર્મ કલ્પયામિ નમઃ - ઇતિ વિધાય ॥ ૯.૧૪॥

પરિષિચ્ય પરિસ્તીર્ય પરિધાય ॥ ૯.૧૫॥

ત્રિણયનમરુણાભં બદ્ધમૌલિં સુશુક્લાં-
શુકમરુણમનેકાકલ્પમમ્ભોજસંસ્થમ્ ।
અભિમતવરશક્તિસ્વસ્તિકાભીતિહસ્તં
નમત કનકમાલાલઙ્કૃતાંસં કૃશાનુમ્ ॥

ઇતિ ધ્યાત્વા ॥ ૯.૧૬॥

(૧) અષ્ટકોણે જાતવેદસે સપ્તજિહ્વાય હવ્યવાહાય અશ્વોદરાય
વૈશ્વાનરાય કૌમારતેજસે વિશ્વમુખાય દેવમુખાય નમઃ - ઇતિ
(૨) ષટ્કોણે ષડઙ્ગં (૩) ત્રિકોણે અગ્નિમન્ત્રેણ અગ્નિં પૂજયિત્વા
॥ ૯.૧૭॥

હિરણ્યાયૈ કનકાયૈ રક્તાયૈ કૃષ્ણાયૈ સુપ્રભાયૈ અતિરક્તાયૈ
બહુરૂપાયૈ નમઃ - ઇત્યગ્નેઃ સપ્તજિહ્વાસુ મૂલશુદ્ધેનાજ્યેન
સપ્તાહુતીઃ કુર્યાત્ ॥ ૯.૧૮॥

વૈશ્વાનરોત્તિષ્ઠ ચિત્પિઙ્ગલૈરગ્નેસ્ત્રિધાઽઽહુતિં વિધાય ॥ ૯.૧૯॥

બહુરૂપજિહ્વાયામિષ્ટાં દેવતામાવાહ્ય પઞ્ચોપચારૈરુપચર્ય ॥ ૯.૨૦॥

સર્વાસાં ચક્રદેવીનામેકાહુતિં હુત્વા નમોઽન્તાન્ પાદુકાઽન્તાન્
શેષાન્ મન્ત્રાન્ સ્વાહાઽન્તાન્ વિધાય જુહુયાત્ ॥ ૯.૨૧॥

અથ પ્રધાનદેવતાયૈ દશાહુતીર્જુહુયાત્ ॥ ૯.૨૨॥

યદિ કામ્યમીપ્સેદભીષ્ટદેવતાયૈ વિજ્ઞાપ્ય સઙ્કલ્પં
કૃત્વૈતાવત્કર્મસિદ્ધ્યર્થમેતાવદાહુતીઃ કરિષ્યામીતિ ॥ ૯.૨૩॥

તિલાજ્યૈઃ શાન્ત્યા, અન્નેનાન્નાયામૃતાય, સમિચ્ચૂત
પલ્લવૈર્જ્વરશમાય, દૂર્વાભિરાયુષે,
કૃતમાલૈર્ધનાય, ઉત્પલૈર્ભાગાય, બિલ્વદલૈ
રાજ્યાય, પદ્મૈઃ સામ્રાજ્યાય,
શુદ્ધલાજૈઃ કન્યાયૈ, નન્દ્યાવર્તૈઃ કવિત્વાય,
વઞ્જુલૈઃ પુષ્ટયૈ, મલ્લિકાજાતીપુન્નાગૈર્ભાગ્યાય,
બન્ધૂકજપાકિંશુકબકુલમધુકરૈરૈશ્વર્યાય,
લવણૈરાકર્ષણાય, કદમ્બૈઃ સર્વવશ્યાય, શાલિતણ્ડુલૈર્ધાન્યાય,
કુઙ્કુમરોચનાદિસુગન્ધૈઃ સૌભાગ્યાય, પલાશપુષ્પૈઃ
કપિલાઘૃતૈર્વા તેજસે, ધત્તૂરકુસુમૈરુન્માદાય,
વિષવૃક્ષૈઃ નિમ્બશ્લેષ્માતકવિભીતકસમિદ્ભિઃ
શત્રુ-નાશાય, નિમ્બતૈલાક્તલવણૈર્મારણાય,
કાકોલૂકપક્ષૈર્વિદ્વેષણાય, તિલતૈલાક્તમરીચૈઃ
કાસશ્વાસનાશાય જુહુયાત્ ॥ ૯.૨૪॥

બલિં પ્રદાય ॥ ૯.૨૫॥

ૐ ભૂરગ્નયે ચ પૃથિવ્યૈ ચ મહતે ચ સ્વાહા ।
ૐ ભુવો વાયવે ચાન્તરિક્ષાય ચ મહતે ચ સ્વાહા ।
ૐ સુવરાદિત્યાય ચ દિવે ચ મહતે ચ સ્વાહા ।
ૐ ભૂર્ભુવસ્સુવશ્ચન્દ્રમસે ચ નક્ષત્રેભ્યશ્ચ દિગ્ભ્યશ્ચ
મહતે ચ સ્વાહા । ઇતિ ચતુર્ભિર્મન્ત્રૈઃ મહાવ્યાહૃતિહોમં
કૃત્વા ॥ ૯.૨૬॥

ઇતઃ પૂર્વં પ્રાણબુદ્ધિદેહધર્માધિકારતો
જાગ્રત્સ્વપ્નસુષુપ્ત્યવસ્થાસુ મનસા વાચા કર્મણા હસ્તાભ્યાં
પદ્ભ્યામુદરેણ શિશ્ના યત્ સ્મૃતં યદુક્તં યત્ કૃતં તત્
સર્વં બ્રહ્માર્પણં ભવતુ સ્વાહા, ઇતિ બ્રહ્માર્પણાહુતિં કૃત્વા ॥ ૯.૨૭॥

ચિદગ્નિં દેવતાં ચાત્મન્યુદ્વાસયામિ નમઃ - ઇત્યુદ્વાસ્ય ॥ ૯.૨૮॥

તદ્ભસ્મતિલકધરો લોકસમ્મોહનકારઃ સુખી વિહરેત્ । ઇતિ શિવમ્ ॥ ૯.૨૯॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-

મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
હોમવિધિર્ નામ નવમઃ ખણ્ડઃ સમાપ્તઃ ॥ ૯॥

---

દશમઃ ખણ્ડઃ સર્વસાધારણક્રમઃ

અથાતઃ સર્વેષાં મન્ત્રાણાં સામાન્યપદ્ધતિં વ્યાખ્યાસ્યામઃ ॥ ૧૦.૧॥

શ્યામાવત્ સન્ધ્યાઽઽદ્યર્ઘ્યશોધનપર્યન્તં ન્યાસવર્જમ્
॥ ૧૦.૨॥

અનુક્તષડઙ્ગસ્ય ષડ્જાતિયુક્તમાયયા ષડઙ્ગમ્ ॥ ૧૦.૩॥

બિન્દુત્રિષડરનાગદલચતુષ્પત્રચતુરસ્રમયં
ચક્રમ્ ॥ ૧૦.૪॥

બિન્દૌ મુખ્યદેવતેચ્છાજ્ઞાનક્રિયાશક્તયસ્ત્ર્યસ્રે
ષડરે તત્તત્ષડઙ્ગાન્યષ્ટદલે બ્રાહ્મ્યાદ્યાઃ ચતુર્દલે
ગણપતિદુર્ગાબટુકક્ષેત્રેશાશ્ચતુરસ્રે દિક્પાલાઃ ॥ ૧૦.૫॥

ત્રિતારીકુમારીભ્યાં સર્વે ક્રમમન્ત્રાઃ પ્રયોક્તવ્યાઃ ॥ ૧૦.૬॥

તત્તન્મૂલેનાવાહનં કલામનુના બલિરનેન ક્રમેણાહુતિઃ ॥ ૧૦.૭॥

અથ રશ્મિમાલા ॥ ૧૦.૮॥

સુપ્તોત્થિતેનૈષા મનસૈકવારમાવર્ત્યા ॥ ૧૦.૯॥

ગાયત્ર્યાદિ પ્રથમં રશ્મિપઞ્ચકમ્
(૧) પ્રણવો ભૂર્ભુવસ્સુવઃ -
તત્સવિતુર્વરેણિયં ભર્ગો દેવસ્ય ધીમહિ ।
ધિયો યો નઃ પ્રચોદયાત્ ॥

ઇતિ ત્રિંશદ્વર્ણા ગાયત્રી ॥

(૨) યત ઇન્દ્ર ભયામહે તતો નો અભયં કુરુ ।
મઘવઞ્છગ્ધિ તવ તન્ ન ઊતયે વિદ્વિષો વિમૃધો જહિ ॥

સ્વસ્તિદા વિશસ્પતિર્વૃત્રહા વિમૃધો વશી ।
વૃષેન્દ્રઃ પુર એતુ નઃ સ્વસ્તિદા અભયઙ્કરઃ ॥

ઇત્યૈન્દ્રી સપ્તષષ્ટ્યર્ણા સઙ્કટે ભયનાશિની ॥

(૩) પ્રણવો ઘૃણિસ્સૂર્ય આદિત્ય ઇત્યષ્ટાર્ણા સૌરી તેજોદા ॥

(૪) પ્રણવઃ કેવલો બ્રહ્મવિદ્યા મુક્તિદા ॥

(૫) તારઃ પરોરજસે સાવદોમ્ ઇતિ નવાર્ણા તુર્યગાયત્રી
સ્વૈક્યવિમર્શિની ॥

રશ્મિપઞ્ચકમેતન્મૂલહૃત્કાલવિધિબિલદ્વાદશાન્તબીજતયા વિમૃષ્ટવ્યમ્
॥ ૧૦.૧૦॥

ચાક્ષુષ્મતીવિદ્યાઽઽદિ દ્વિતીયં રશ્મિપઞ્ચકમ્
(૧) સૂર્યાક્ષિતેજસે નમઃ । (૨) ખેચરાય નમઃ । (૩) અસતો મા સદ્
ગમય । (૪) તમસો મા જ્યોતિર્ગમય । (૫) મૃત્યોર્માઽમૃતં ગમય ।
(૬) ઉષ્ણો ભગવાન્ શુચિરૂપઃ । (૭) હંસો ભગવાન્ શુચિરપ્રતિરૂપઃ ॥

(૮) વિશ્વરૂપં ઘૃણિનં જાતવેદસં
હિરણ્મયં જ્યોતિરેકં તપન્તમ્ ।
સહસ્રરશ્મિઃ શતધા વર્તમાનઃ
પ્રાણઃ પ્રજાનામુદયત્યેષ સૂર્યઃ ॥

(૯) ૐ નમો ભગવતે સૂર્યાય અહો વાહિનિ વાહિન્યહો વાહિનિ વાહિનિ
સ્વાહા ॥

(૧૦) વયસ્સુપર્ણા ઉપસેદુરિન્દ્રં પ્રિયમેધા ઋષયો નાથમાનાઃ ।
અપધ્વાન્તમૂર્ણુહિ પૂર્ધિ ચક્ષુર્મુમુગ્ધ્યસ્માન્નિધયેવ બદ્ધાન્ ॥

(૧૧) પુણ્ડરીકાક્ષાય નમઃ । (૧૨) પુષ્કરેક્ષણાય નમઃ । (૧૩)
અમલેક્ષણાય નમઃ । (૧૪) કમલેક્ષણાય નમઃ । (૧૫) વિશ્વરૂપાય
નમઃ । (૧૬) શ્રીમહાવિષ્ણવે નમઃ ॥

ઇતિ ષોડશમન્ત્રસમષ્ટિરૂપિણી દૂરદૃષ્ટિપ્રદા ચાક્ષુષ્મતી
વિદ્યા ॥ ૧૦.૧૧॥

પ્રણવો ગન્ધર્વરાજ વિશ્વાવસો મમ અભિલષિતામુકાં કન્યાં
પ્રયચ્છ તતોઽગ્નિવલ્લભેત્યુત્તમકન્યાવિવાહદાયિની વિદ્યા
॥ ૧૦.૧૨॥

તારો નમો રુદ્રાય પથિષદે સ્વસ્તિ મા સમ્પારય - ઇતિ
માર્ગસઙ્કટહારિણી વિદ્યા ॥ ૧૦.૧૩॥

તારસ્તારે પદમુક્ત્વા તુત્તારે તુરે શબ્દં ચ દહનદયિતેતિ
જલાપચ્છમની વિદ્યા ॥ ૧૦.૧૪॥

અચ્યુતાય નમઃ અનન્તાય નમઃ ગોવિન્દાય નમઃ - ઇતિ
મહાવ્યાધિવિનાશિની નામત્રયી વિદ્યા ॥ ૧૦.૧૫॥

પઞ્ચેમા રશ્મયો મૂલાદિપરિકરતયા પ્રપઞ્ચ્યાઃ ॥ ૧૦.૧૬॥

પ્રણવઃ કમલા ભુવના મદનો ગ્લાચ્ચતુર્દશપઞ્ચદશૌ
ગં ગણપતયે વરયુગલં દ સર્વજનં મે શબ્દો
વશમાનયાગ્નિવામલોચનેતિ મહાગણપતિવિદ્યા પ્રત્યૂહ શમની ॥ ૧૦.૧૭॥

પ્રણવો નમઃ શિવાયૈ પ્રણવો નમઃ શિવાયેતિ દ્વાદશાર્ણા
શિવતત્ત્વવિમર્શિની વિદ્યા ॥ ૧૦.૧૮॥

પ્રણવઃ કાષ્ટમ દક્ષશ્રુતિબિન્દુપિણ્ડો ભૃગુષોડશો માં
પાલયદ્વન્દ્વમિતિ દશાર્ણા મૃત્યોરપિ મૃત્યુરેષા વિદ્યા ॥ ૧૦.૧૯॥

તારઃ નમો બ્રહ્મણે ધારણં મે અસ્ત્વનિરાકરણં ધારયિતા ભૂયાસં
કર્ણયોઃ શ્રુતં માચ્યોઢ્વં મમામુષ્ય ૐ - ઇતિ શ્રુતધારિણી વિદ્યા
॥ ૧૦.૨૦॥

શ્રીકણ્ઠાદિક્ષાન્તાઃ સર્વે વર્ણાઃ બિન્દુસહિતાઃ માતૃકા
સર્વજ્ઞતાકરી વિદ્યા ॥ ૧૦.૨૧॥

રશ્મયઃ પઞ્ચ મૂલાદિરક્ષાઽઽત્મકતયા યષ્ટવ્યાઃ ॥ ૧૦.૨૨॥

શિવશક્તિકામક્ષિતિમાયારવીન્દુસ્મરહંસ
પુરન્દરભુવનાપરામન્મથવાસવભૌવનાશ્ચ શિવાદિવિદ્યા
સ્વસ્વરૂપવિમર્શિની ॥ ૧૦.૨૩॥

ક્લશબ્દાદ્વામેક્ષણબિન્દુરેકોઽનન્તયોનિબિન્દવોઽન્યઃ
શઙ્કરપરાત્રિશૂલવિસૃષ્ટયોઽપરશ્ચૈત એવ ખણ્ડાઃ
પ્રતિલોમાઃ ષટ્કૂટા સમ્પત્કરી વિદ્યા ॥ ૧૦.૨૪॥

સમુચ્ચાર્ય સૃષ્ટિનિત્યે સ્વાહેતિ હમિત્યુક્ત્વા સ્થિતિપૂર્ણે નમઃ -

ઇત્યનલબિન્દુમહાસંહારિણી કૃશે પદાચ્ચણ્ડશબ્દઃ કાલિ ફટ્
- ઇત્યગ્નિબિન્દુસપ્તમમુદ્રાબીજં મહાનાખ્યે અનન્તભાસ્કરિ
મહાચણ્ડપદાત્ કાલિ ફટ્ - ઇતિ સૃષ્ટિસ્થિતિસંહારાખ્યાનાં
પ્રાતિલોમ્યં ખેચરીબીજં મહાચણ્ડવાણી ચ યોગીશ્વરીતિ
વિદ્યાપઞ્ચકરૂપિણી કાલસઙ્કર્ષિણી પરમાયુઃ પ્રદાયિની ॥ ૧૦.૨૫॥

ત્રિતારી સપ્તમમુદ્રા શિવયુક્શક્તિરહંયુગલમેતત્પઞ્ચૈવ
લોમ્યમિતિ શુદ્ધજ્ઞાનમયી શામ્ભવી વિદ્યા ॥ ૧૦.૨૬॥

ભૃગુત્રિશૂલવિસૃષ્ટયઃ પરાવિદ્યા ॥ ૧૦.૨૭॥

પઞ્ચેમા રશ્મયો મૂલાદ્યધિષ્ઠાનતયા પરિકલ્પનીયાઃ ॥ ૧૦.૨૮॥

વાક્કામશક્તયોઽનુલોમવિલોમાઃ પુનરનુલોમાઃ - ઇતિ શ્રિયો
ઽઙ્ગબાલા ॥ ૧૦.૨૯॥

ભુવના કમલા સુભગા તારો નમો ભગવતિ પૂર્ણે શેખરમન્ન
મમાભિલષિતમુક્ત્વાઽન્નં દેહિ દહનજાયેતિ શ્રિય
ઉપાઙ્ગમન્નપૂર્ણા ॥ ૧૦.૩૦॥

પ્રણવઃ પાશાદિત્ર્યર્ણા એહિ પરમેશ્વરીત્યુક્ત્વા
વહ્નિવામાક્ષ્યુક્તિરિતિ શ્રીપ્રત્યઙ્ગમશ્વારૂઢા ॥ ૧૦.૩૧॥

તારિત્રિકં સપ્તમમુદ્રા
શિવશક્તિસંવર્તપુપઞ્ચમપુરન્દરવરયૂં
શક્તિશિવક્ષમાન્તે વાદિવરયીં
શિવભૃગુત્રિશૂલબિન્દુભૃગુશિવત્રિશૂલવિસૃષ્ટયઃ
શ્રીપૂર્વં સ્વગુરુનામતોઽષ્ટાક્ષરી ચેતિ શ્રીપાદુકા ચ ॥ ૧૦.૩૨॥

એતાભિશ્ચતસૃભિર્યુક્તા મૂલવિદ્યા સામ્રાજ્ઞી મૂલાધારે વિલોચનીયા
॥ ૧૦.૩૩॥

માદનશક્તિબિન્દુમાલિનીવાસવમાયાઘોષદોષાકર
કન્દર્પગગનમઘવદ્ભુવનભૃગુપુષ્પબાણભૂમાયેતિ
સેયં તસ્યા મહાવિદ્યા ॥ ૧૦.૩૪॥

વાઙ્નતિરુચ્છિષ્ટચાણ્ડલિ માતમુક્ત્વા ગિ સર્વપદાદ્વશઙ્કરિ
વહ્નિવામલોચનેતિ શ્યામાઽઙ્ગં લઘુશ્યામા ॥ ૧૦.૩૫॥

કુમારીમુચ્ચાર્ય વદદ્વન્દ્વં વાક્પદં વાદિનિ વહ્નિપ્રિયેતિ
શ્યામોપાઙ્ગં વાગ્વાદિની ॥ ૧૦.૩૬॥

પ્રણવ ઓપિનાકુદમ્પવૃપસસ્યૈચશાચામાહદશબ્દાઃ
ૠાધાનલીતૈઃરિતાવિઃર્વવાઈનારુમિહવાયેચ્છેખરા
નકુલી શ્યામાપ્રત્યઙ્ગમ્ ॥ ૧૦.૩૭॥

લલિતાપાદુકાદિત્રિકસ્થાને કુમારી યોજ્યા શિષ્ટં તદ્વત્ - ઇતિ
શ્યામાપાદુકા ચ ॥ ૧૦.૩૮॥

ચતસૃભિર્યુક્તા હૃચ્ચક્રે શ્યામા યષ્ટવ્યા ॥ ૧૦.૩૯॥

તદ્વિદ્યા તુ ત્રિતારી કુમારી નભવશ્રીતંશ્વસજમ
હાસમુરંનિમાયાસરાવકસસ્ત્રીરુવકસ
દુમૃવકસસવકસલોવકાકંવમાયહાવર્ણા
 ઓંમોગતિમાગીરિર્વનનોરિર્વખ
જિમદનશ્રીંર્વજશંરિર્વપુષશંરિર્વ
ૠગશંરિર્વત્વશંરિર્વકશંરિમુમેશનસ્વાઽન્ત
મન્ત્રાદિ બીજષટ્કં પ્રાતિલોમ્યમિતિ અષ્ટનવતિવર્ણાઃ ॥ ૧૦.૪૦॥

હરઃ સબિન્દુર્વાપૂર્વરાહિ સ્થાણુઃ સબિન્દુરુન્મત્તપદં
ભૈશબ્દો રવિપાદુકાભ્યાં નમ - ઇતિ વાર્તાલ્યઙ્ગં લઘુવાર્તાલી
 ॥ ૧૦.૪૧॥

વેદાદિભુવનં નમો વારાહિ ઘોરે સ્વપ્નં ઠદ્વિતયં અગ્નિદારા -
ઇતિ વાર્તાલ્યુપાઙ્ગં સ્વપ્નવાર્તાલી સ્વપ્ને શુભાશુભફલવક્ત્રી
 ॥ ૧૦.૪૨॥

વાગ્ઘૃદયં ભગવતિ તિરસ્કરિણિ મહામાયે
પશુપદાજ્જનમનશ્ચક્ષુસ્તિરસ્કરણં કુરુ દ્વિતયં વર્મ ફટ્
પાવકપરિગ્રહ ઇતિ વાર્તાલીપ્રત્યઙ્ગં તિરસ્કરિણી ॥ ૧૦.૪૩॥

શ્યામાપાદુકામન્ત્રાદિત્રિબીજમપહાય વાગ્ગ્લૌમ્ - ઇતિ યોજ્યમ્ ।
એષા વાર્તાલીપાદુકા ॥ ૧૦.૪૪॥

વિદ્યાભિરેતાભિર્યુક્તા ફાલચક્રે પરિપૂજ્યા ભગવતીયં

ભૂદારમુખી ॥ ૧૦.૪૫॥

મનુરિદમીયોઽયં વાક્પુટિતં ગ્લૌં
ન ભવવાલિર્તાવાહિરાવહખિરામુઅંઅંનિમઃ-
ઘેધિનજઞ્જંનિમઃ હેહિન સ્તંસ્તંનિમઃર્વષ્ટ
દુનાંર્વેસવાક્તત્ક્ષુખતિહ્નાભકુકુશીવશબ્દા
યથાક્રમં મોગતિર્તાવાલિરાવાહિરામુવહખિ
ઘેધિનરુંરુંનિમઃ ભેભિનમોમોનિમઃ ભેભિ
નસદુપ્રષ્ટાસષાંર્વચિચર્મુગજિસ્તંનં
રુરુધ્રંશ્યંશબ્દોપેતા વાક્ ગ્લૌં વિસૃષ્ટયન્તાશ્ચ
સપ્તમાશ્ચત્વારો વર્માસ્ત્રાય ફડિતિ દ્વાદશોત્તરશતાક્ષરા ॥ ૧૦.૪૬॥

પઞ્ચમૈકાદશબીજવર્જા શ્રીરેવ શ્રીપૂર્તિવિદ્યા બ્રહ્મકોટરે
યષ્ટવ્યા ॥ ૧૦.૪૭॥

શ્યામાપાદુકાપ્રથમત્રિકસ્થાને તારત્રયં કુમારી વાક્ ગ્લૌં
ઇતિ યોજ્યમ્ । તતઃ પરસ્તાચ્છેષં સમાનમ્ ॥ ૧૦.૪૮॥

ઇયં મહાપાદુકા સર્વમન્ત્રસમષ્ટિરૂપિણી સ્વૈક્યવિમર્શિની
મહાસિદ્ધિપ્રદાયિની દ્વાદશાન્તે યષ્ટવ્યા ॥ ૧૦.૪૯॥

એવં રશ્મિમાલા સમ્પૂર્ણા । સર્વગાત્રઃ શુદ્ધવિદ્યામયતનુઃ
સ એવ પરમશિવઃ ॥ ૧૦.૫૦॥

અથ વિઘ્ન-દેવતાઃ । ઇરિમિલિકિરિકિલિપદાત્ પરિમિરોમિત્યેકઃ
। પ્રણવો માયા નમો ભગવતિ મહાત્રિપુરાદ્ભૈવર્ણાદ્રવિપદમનુ
મમ ત્રૈપુરરક્ષાં કુરુ કુરુ - ઇતિ દ્વિતીયઃ । સંહર સંહર
વિઘ્નરક્ષોવિભીષકાન્ કાલય હું ફટ્ સ્વાહા - ઇતિ તૃતીયઃ । બ્લૂં
રક્તાભ્યો યોગિનીભ્યો નમઃ - ઇતિ ચતુર્થઃ । સાં સારસાય બહ્વાશનાય
નમઃ - ઇતિ પઞ્ચમઃ । દુમુલુષુમુલુષુ માયા ચામુણ્ડાયૈ નમઃ -
ઇતિ ષષ્ઠઃ । એતે મનવો લલિતાજપવિઘ્નદેવતાઃ ॥ ૧૦.૫૧॥

હસન્તિ હસિતાલાપે પદં માતમુક્ત્વા ગીપરિચારિકે મમ
ભયવિઘ્નનાશં કુરુદ્વિતયં સવિસર્ગઠત્રિતયમિતિ
શ્યામાવિઘ્નદેવી ॥ ૧૦.૫૨॥

સ્તં સ્તમ્ભિન્યૈ નમઃ - ઇતિ કોલમુખીવિઘ્નદેવી ॥ ૧૦.૫૩॥

એતે તત્તજ્જપારમ્ભે જપ્તવ્યાઃ ॥ ૧૦.૫૪॥

લલિતા પ્રાહ્ણે । અપરાહ્ણે શ્યામા । વાર્તાલી રાત્રૌ । બ્રાહ્મે મુહૂર્તે પરા ॥ ૧૦.૫૫॥

વ્યવહારદેશસ્વાત્મ્યપ્રાણોદ્વેગસહાયામયવયાંસિ પ્રવિચાર્યૈવ તદનુકૂલઃ પઞ્ચમાદિપરામર્શઃ ॥ ૧૦.૫૬॥

સર્વભૂતૈરવિરોધઃ ॥ ૧૦.૫૭॥

પરિપન્થિષુ નિગ્રહઃ ॥ ૧૦.૫૮॥

અનુગ્રહઃ સંશ્રિતેષુ ॥ ૧૦.૫૯॥

ગુરુવત્ ગુરુપુત્રકલત્રાદિષુ વૃત્તિઃ ॥ ૧૦.૬૦॥

આદિમસ્ય સ્વયં સેવનમાગમદૃષ્ટ્યા દોષદં ત્યાજ્યમ્ ॥ ૧૦.૬૧॥

સાનન્દસ્ય રુચિરસ્યામોદિનો લઘુનો વાર્ક્ષસ્ય ગૌડસ્ય પિષ્ટપ્રકૃતિનઃ અન્ધસો વાલ્કલસ્ય કૌસુમસ્ય વા યથાદેશસિદ્ધસ્ય વા તસ્ય પરિગ્રહઃ ॥ ૧૦.૬૨॥

તદનન્તરં મધ્યમયોરસ્વયમસુવિમોચનમ્ । ઉપાદિમે નાયં નિયમઃ । મધ્યમે તુ સ્વયં સંજ્ઞપને તત્રાયં મન્ત્રઃ -
ઉદ્બુધ્યસ્વ પશો ત્વં હિ નાશિવસ્ત્વં શિવો હ્યસિ ।
શિવોત્કૃત્તમિદં પિણ્ડં મત્તસ્ત્વં શિવતાં વ્રજ ॥

ઇતિ ॥ ૧૦.૬૩॥

સર્વત્ર વચનપૂર્વં પ્રવૃત્તિઃ ॥ ૧૦.૬૪॥

દશકુલવૃક્ષાનુપપ્લવઃ ॥ ૧૦.૬૫॥

સ્ત્રીવૃન્દાદિમકલશસિદ્ધલિઙ્ગિક્રીડાડડકુલકુમારીકુલ સહકારાશોકૈકતરુપરેતાવનિમત્તવેશ્યાશ્યામારક્ત વસનામત્તેભાનાં દર્શને વન્દનમ્ ॥ ૧૦.૬૬॥

પઞ્ચપર્વસુ વિશેષાર્ચા ॥ ૧૦.૬૭॥

આરમ્ભતરુણયૌવનપ્રૌઢતદન્તોન્મનાનવસ્થોલ્લાસેષુ

પ્રૌઢાન્તાઃ સમયાચારાઃ । તતઃ પરં યથાકામી । સ્વૈરવ્યવહારેષુ
વીરાવીરેષ્વયથામનનાદધઃપાતઃ ॥ ૧૦.૬૮॥

રક્તાત્યાગવિરક્તાઽઽક્રમણોદાસીનાપ્રલોભનવર્જનમ્ ॥ ૧૦.૬૯॥

ઘૃણાશઙ્કાભયલજ્જાજુગુપ્સાકુલજાતિશીલાનાં
ક્રમેણાવસાદનમ્ ॥ ૧૦.૭૦॥

ગુરુપ્રગુરુસન્નિપાતે પ્રગુરોઃ પ્રથમં પ્રણતિઃ તદગ્રે
તદનુરોધેન તન્નતિવર્જનમ્ ॥ ૧૦.૭૧॥

અભ્યર્હિતેષ્વપરાઙ્મુખ્યમ્ ॥ ૧૦.૭૨॥

મુખ્યતયા પ્રકાશવિભાવના ॥ ૧૦.૭૩॥

અધિજિગમિષા શરીરાર્થાસૂનાં ગુરવે ધારણમ્ ॥ ૧૦.૭૪॥

એતદુક્તકરણમ્ ॥ ૧૦.૭૫॥

અપરીક્ષણં તદ્વચને વ્યવસ્થા ॥ ૧૦.૭૬॥

સર્વથા સત્યવચનમ્ ॥ ૧૦.૭૭॥

પરદારધનેષ્વનાસક્તિઃ ॥ ૧૦.૭૮॥

સ્વસ્તુતિપરનિન્દામર્મવિરુદ્ધવચનપરિહાસ
ધિક્કારાક્રોશત્રાસનવર્જનમ્ ॥ ૧૦.૭૯॥

પ્રયત્નેન વિદ્યાઽઽરાધનદ્વારા પૂર્ણખ્યાતિસમાવેશનેચ્છા
ચેત્યેતે સામાયિકાચારાઃ ॥ ૧૦.૮૦॥

પરે ચ શાસ્ત્રાનુશિષ્ટાઃ ॥ ૧૦.૮૧॥

ઇત્થં વિદિત્વા વિધિવદનુષ્ઠિતવતઃ કુલનિષ્ઠસ્ય સર્વતઃ
કૃતકૃત્યતા શરીરત્યાગે શ્વપચગૃહકાશ્યોર્નાન્તરં
જીવન્મુક્તઃ ॥ ૧૦.૮૨॥

ય ઇમાં દશખણ્ડીં મહોપનિષદં
મહાત્રૈપુરસિદ્ધાન્તસર્વસ્વભૂતામધીતે સઃ - સર્વેષુ
યજ્ઞેષુ યષ્ટા ભવતિ યં યં ક્રતુમધીતે તેન તેનાસ્યેષ્ટં ભવતિ
ઇતિ હિ શ્રૂયતે ઇત્યુપનિષત્ - ઇતિ શિવમ્ ॥ ૧૦.૮૩॥

અથાતઃ સર્વેષાં મન્ત્રાણાં અથ સ્વેષ્ટમન્ત્રસ્ય ઇતિ વિધિવત્,
ઇત્થં સાઙ્ગાં, ઇયમેવ મહતી વિદ્યા, અથ પ્રાથમિકે ચતુરસ્રે,
અથ હૃચ્ચક્રસ્થિતાં, એવં ગણપતિમિષ્ટ્વા, ઇત્થં સદ્ગુરોઃ,
અથાતો દીક્ષાં વ્યાખ્યાસ્યામઃ । અથ એવં, અથ ઇત્થં, અથ સ્વેષ્ટેતિ
પઞ્ચ ॥ ૧૦.૮૪॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
સર્વસાધારણક્રમ નામ દશમઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૦॥

ઇતિ શ્રીપરશુરામકલ્પસૂત્રં પ્રથમોભાગઃ સમ્પૂર્ણમ્ ॥

---

દ્વિતીયોભાગઃ (અનુબન્ધઃ - પરશુરામકલ્પસૂત્રપરિશિષ્ટમ્)
એકાદશઃ ખણ્ડઃ યન્ત્રવિધાનમ્

અથાતો વાર્તાલીસિદ્ધિયન્ત્રં વ્યાખ્યાસ્યામઃ ॥ ૧૧.૧॥

ભુવનેશ્વરીબીજમધ્યે વૃત્તદ્વયં વિધાય તન્મધ્યે વ્યતિભિન્નં
ચતુરશ્રદ્વયં વિધાય તદન્તર્વૃત્તં કૃત્વા
તદન્તર્વૃત્તસપ્તકયુક્તાનિ સપ્તષટ્કોણાનિ
યથાસમ્પ્રદાયં વિદધ્યાત્ ॥ ૧૧.૨॥

તત્ર અષ્ટસુ કોણેષુ અષ્ટસ્વન્તરાળેષુ ચ
દશોત્તરશતાક્ષરીવિદ્યાયાઃ ષોડશવર્ણાન્
અકારાદિકકારાન્તષોડશસ્વરરહિતષોડશવર્ણસહિતાન્ સંલિખ્ય
પૂર્વષટ્કોણષટ્સુ કોણેષુ ષટ્સુ અન્તરાલેષુ ચ ખકારાદિડકારાન્તાન્
તદ્વાદશવર્ણાન્ સંલિખ્ય પુનરગ્નિકોણસ્થષટ્કોણે ઢકારાદિમકારાન્તાન્
દ્વાદશવર્ણસહિતાન્ દ્વાદશવર્ણાન્ રાક્ષસકોણસ્થષટ્કોણે
યકારાદ્યાકારાન્તદ્વાદશવર્ણયુક્તાન્ દ્વાદશવર્ણાન્ પશ્ચિમકોણે
ઇકારાદ્યૌકારાન્તસહિતાન્ વસુકોણે અઙ્કારાદિટકારાન્તસહિતાન્ દશ (ઈશ)કોણે
ઠકારાદિબકારાન્તયુતાન્ મધ્યષટ્કોણે ભકારાદિક્ષકારાન્તસંયુક્તાન્
વિલિખ્ય લક્ષતાદ્યદ્વયવૃત્તાન્તરાલવીથ્યાં શિષ્ટાન્ દશવર્ણાન્
ઓગજડદબલકૃસંયુક્તાન્ વિલિખેત્ ॥ ૧૧.૩॥

અથ નવગ્રહયન્ત્રં વ્યાખ્યાસ્યામઃ । નવકોષ્ઠાન્ વિધાય, નવસુ
કોણેષુ વૃત્તત્રયં વિધાય, નવકર્ણિકાસુ નવકોષ્ઠાન્ વિલિખ્ય,
નવસુ કોષ્ઠેષુ મધ્યકોષ્ઠેષુ મધ્યકોષ્ઠ- વૃત્તત્રયં
કર્ણિકાસ્થ નવકોષ્ઠં, મધ્યકોષ્ઠે મકારસહિતં પ્રણવં
વિલિખ્ય, શિષ્ટેષ્વષ્ટસુ કોષ્ઠેષુ અકારાદ્યૃકારાન્તાનષ્ટસ્વરાન્
વિલિખ્ય, અન્તર્વૃત્તાન્તરાલે મકારસહિતાન્ ષોડશસ્વરાન્ લિખિત્વા
બહિર્વૃત્તાન્તરાલે અકારાદક્ષકારાન્તાન્ માતૃકાર્ણાન્ વિલિખેત્ ॥ ૧૧.૪॥

એવં ભાસ્કરમણ્ડલં મધ્યે કૃત્વા પૂર્વકોષ્ઠવૃત્તત્રય-
કર્ણિકાસ્થિતનવસુ કોષ્ઠેષુ મધ્યકોષ્ઠે ૡકારગર્ભં પ્રણવં
વિલિખ્ય, પૂર્વાદ્યષ્ટસુ કોષ્ટેષુ ૡકારાદિવિસર્ગાન્તાનષ્ટસ્વરાંશ્ચ
વિલિખ્ય, અન્તર્વૃત્તાન્તરાલે ૡકારસહિતાન્ ષોડશ-
સ્વરાન્, સંલિખ્ય બાહ્યવૃત્તાન્તરાલે અકારાદિક્ષકા-
રાન્તાન્ લિખેત્ ॥ ૧૧.૫॥

એવં ચન્દ્રમણ્ડલં વિધાય, અગ્નિસ્થિતવૃત્તત્રયકર્ણિકા-
નવકોષ્ઠમધ્યકોષ્ઠે પ્રણવગર્ભકકારં વિલિખ્ય, ઈશાનકોષ્ઠા-
દિરાક્ષસકોષ્ઠાન્તં કવર્ગં વિલિખ્ય, પશ્ચિમકોષ્ઠાદિસોમ-
કોષ્ઠાન્તકોષ્ઠત્રયે ભૌમાયેતિ વર્ણત્રયં વિલિખ્ય, અન્તર્વૃત્તા-
ન્તરાલે કકારસહિતાન્ ષોડશસ્વરાન્ સંલિખ્ય, બાહ્યવૃત્તા-
ન્તરાલવીથ્યાં માતૃકાં લિખેત્ । એવં ભૌમમણ્ડલં વિધાય
બુધમણ્ડલં લિખેત્ ॥ ૧૧.૬॥

દક્ષિણકોષ્ઠસ્થવૃત્તત્રયકર્ણિકાસ્થિતનવકોષ્ઠેષુ મધ્ય-
કોષ્ઠે ચ કાગર્ભં પ્રણવં વિલિખ્ય, ઈશાનાદિપઞ્ચકોષ્ઠેષુ ચવર્ગં
વિલિખ્ય, કોષ્ટત્રયે બુધાયેતિ વર્ણત્રયં ચ વિલિખ્ય પૂર્વવત્
ષોડશસ્વરસહિતં ચકારં વિલિખ્ય, માતૃકાર્ણં ચ વિલિખ્ય,
નૈરૃતિકોષ્ઠસ્થવૃત્તત્રયકર્ણિકાસ્થિતનવકોષ્ઠકે મધ્યકોષ્ઠે
પકારગર્ભં પ્રણવં વિલિખ્ય, શિવાદિકોષ્ઠપઞ્ચકે પવર્ગં
વિલિખ્ય, શિષ્ટકોષ્ઠત્રયે સૌરયે ઇતિ શનિનામવર્ણાન્
આલિખ્ય, અન્તરાલદ્વયે પકારં માતૃકાં ચ વિલિખ્ય,
પશ્ચિમકોષ્ઠસ્થવૃત્તત્રયકર્ણિકામધ્યે કોષ્ઠનવકં વિધાય,
તન્મધ્યકોષ્ઠે ટકારગર્ભં પ્રણવં વિલિખ્ય, ઈશાનાદિકોષ્ઠ-

પઞ્ચકે ટવર્ણાન્ વિલિખ્ય, કોષ્ઠત્રયે ગુરવ ઇતિ વિલિખ્ય,
પૂર્વવદન્તરાલદ્વયે ટવર્ગં માતૃકાં ચ વિલિખેત્ ॥ ૧૧.૭॥

એવં ગુરુમણ્ડલં વિધાય વાયુકોષ્ઠે મધ્યે યકારગર્ભં પ્રણવં
વિલિખ્ય, ઈશાનાદિકોષ્ઠપઞ્ચકે યવર્ગં વિલખ્ય, રાહવ ઇતિ
લિખિત્વા, સોમકોષ્ઠમધ્યે કોષ્ઠે તકારગર્ભં પ્રણવં લિખિત્વા,
ઈશાદિકોષ્ઠેષુ તવર્ગં શુક્રાયેતિ વિલિખ્ય, ઈશાનકોષ્ઠે મધ્યે
શકારં વિલિખ્ય, ઈશાદ્યષ્ટસુ કોષ્ઠેષુ ષવર્ગં કેતવ - ઇતિ ચ
વિલિખ્ય, અન્તરાલદ્વયે ષોડશસ્વરસહિતં શકારં માતૃકાં ચ
વિલિખેત્ ઇતિ નવગ્રહચક્રં વિધાય, નવગ્રહપૂજાં કુર્યાત્ - ઇતિ શિવમ્
॥ ૧૧.૮॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
યન્ત્રવિધાન નામૈકાદશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૧॥

---

## દ્વાદશઃ ખણ્ડઃ મન્ત્રવિધાનમ્

અથાતઃ શિવાત્મકાન્ મન્ત્રાન્ વ્યાખ્યાસ્યામઃ ॥ ૧૨.૧॥

ઐં હ્રીં શ્રીં હ્સ્ખ્ફ્રેં હસહહરીઃ અમૃતવિગ્રહા
પઞ્ચાર્ણા (૫) ॥ ૧૨.૨॥

ૐ જું સઃ પાલય પાલય સઃ જું ૐ ઇતિ મૃત્યુઞ્જય
વિદ્યા દ્વાદશાર્ણા (૧૨) ॥ ૧૨.૩॥

શ્રીં હ્રીં ક્લીં - ત્રિપુટાવિદ્યા - ઇતિ ત્રિવર્ણા (૩) ॥ ૧૨.૪॥

ૐ હ્રાં હ્રીં હ્રૂં વૈરિમોહિ ગરુડપક્ષિ હર હર હિંસ
હિંસ સ્વાહા - ઇતિ ગરુડમન્ત્રઃ ત્રયોવિંશત્યક્ષરાત્મકઃ (૨૩) ॥ ૧૨.૫॥

ૐ એહિ પરમેશ્વરિ સ્વાહા - ઇત્યશ્વારૂઢા દશાક્ષરી (૧૦) ॥ ૧૨.૬॥

ૐ નમો ભગવતિ માહેશ્વરિ અન્નપૂર્ણે સ્વાહા -
ઇત્યન્નપૂર્ણાવિદ્યા સપ્તદશાક્ષરી (૧૭) ॥ ૧૨.૭॥

હસક્ષમલવરયૂં - ઇત્યેકાક્ષરો નવાત્મકો મન્ત્રઃ (૧) ॥ ૧૨.૮॥

સહક્ષમલવરયીં - ઇત્યેકાક્ષરા નવાત્મિકા (૧) ॥ ૧૨.૯॥

ૐ હ્રીં નમ - ઇતિ દેવીહૃદયવિદ્યા ચતુર્વર્ણા (૪) ॥ ૧૨.૧૦॥

ૐ રુદ્રદયિતે યોગેશ્વરિ સ્વાહા ઇતિ દ્વાદશાર્ણા
ગૌરીવિદ્યા (૧૨) ॥ ૧૨.૧૧॥

ઇટિ ઇટિ મુટિ મુટિ કાકટમુણ્ડિ સ્વાહા - ઇતિ
લક્ષસુવર્ણપ્રદા પઞ્ચદશાક્ષરી (૧૫) ॥ ૧૨.૧૨॥

ૐ નવકેશી કનકવતી સ્વાહા - ઇતિ નિષ્કત્રયપ્રદા
વિદ્યા દ્વાદશાક્ષરી (૧૨) ॥ ૧૨.૧૩॥

એકાયકુણાણાતુકે - ઇત્યભીષ્ટદાયિની વિદ્યાઽષ્ટાક્ષરી (૮) ॥ ૧૨.૧૪॥

ઐં હ્રીં શ્રીં માતઙ્ગિન્યૈ સ્વાહા શ્રીં હ્રીં ઐં - ઇતિ
માતઙ્ગિનીવિદ્યા દ્વાદશાક્ષરી (૧૨) ॥ ૧૨.૧૫॥

હ્રીં શ્રીં ક્લેં અ ઇ રાજ્યદે રાજ્યલક્ષ્મી સઃ ક્લેં શ્રીં હ્રી
- ઇતિ રાજ્યલક્ષ્મીવિદ્યા ષોડશાક્ષરી (૧૬) ॥ ૧૨.૧૬॥

ૐ શ્રીં હ્રીં શ્રીં કમલે કમલાલયે પ્રસીદ પ્રસીદ
શ્રીં હ્રીં શ્રીં મહાલક્ષ્મ્યૈ નમઃ - ઇતિ મહાલક્ષ્મીવિદ્યા
સપ્તવિંશતિવર્ણા (૨૭) ॥ ૧૨.૧૭॥

જ ઝ રી મ હા ચ ણ્ડ તે જ સ્સ ક ર્ષિ ણી કા લ મં થા ને હઃ
- ઇતિ સિદ્ધલક્ષ્મીવિદ્યા સપ્તદશાર્ણા (૧૭) ॥ ૧૨.૧૮॥

ૐ ગલયૌં ૐ, હ્રીં ગલયૌં હ્રીં, ક્લીં ગલયૌં ક્લીં, ઐં
ગલયૌં ઐં, ક્લૂં ગલયૌં ક્લૂં, સ્ત્રીં ગલયૌં સ્ત્રીં,
હ્રીં ક્લીં ઐં ક્લૂં સ્ત્રીં ગલયૌં દ્રાં દ્રીં ક્લીં ક્લૂં સઃ,
એતે સપ્તગોપાલમન્ત્રાઃ ॥ ૧૨.૧૯॥

એતેષાં પારાયણાત્ સર્વસિદ્ધીશ્વરો ભવેત્ - ઇતિ શિવમ્ ॥ ૧૨.૨૦॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે

મન્ત્રવિધાન નામ દ્વાદશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૨॥

---

ત્રયોદશઃ ખણ્ડઃ પ્રસ્તારક્રમઃ

અથાતઃ પ્રસ્તારક્રમં વ્યાખ્યાસ્યામઃ ॥ ૧૩.૧॥

અથાતઃ સ્વેચ્છયા કતિચિત્ ધ્રુવાક્ષરાણિ કેનચિત્ પ્રકારેણ
વિલિખ્ય, તેષ્વન્ત્યશિરસિ બિન્દું વિલિખ્ય, ઉપાન્ત્યવર્ણમારભ્ય
પ્રથમવર્ણપર્યન્તં વ્યુત્ક્રમેણ એકૈકસ્ય વર્ણસ્ય શિરસ્યેકૈકમઙ્કં
એકદ્વિત્રિચતુઃપઞ્ચષડાદિરૂપમેકોત્તરાભિવૃદ્ધિં વિલિખ્ય, તત
એકેન દ્વયં દ્વાભ્યાં ત્રયં ત્રિભિશ્ચતુષ્ટયમિત્યેવં ક્રમેણ
તાનઙ્કાન્ ગુણયેત્ ॥ ૧૩.૨॥

તેન હસકલહ્રીંરૂપેષુ ધ્રુવેષુ માયાબીજસ્ય શિરસિ
શૂન્યં લકારસ્ય શિરસ્યેકં કકારસ્ય દ્વૌ સકારસ્ય ષટ્
હકારસ્ય ચતુર્વિંશતિઃ - ઇતિ સિધ્યતિ ॥ ૧૩.૩॥

ઈદૃશસ્ય બિન્દ્વાદ્યં કવર્ગસ્ય ખણ્ડાઙ્ક - ઇતિ સંજ્ઞા,
નષ્ટોદ્દિષ્ટાદિષુ વ્યવહારાર્થં કૃતા ॥ ૧૩.૪॥

તત ઔત્તરાધર્યેણ ચતુર્વિંશતિવારં વિલિખ્ય તદધસ્તથૈવ
સકારાંસ્તદધઃ કકારાંસ્તદધઃ લકારાંસ્તદધઃ માયાં વિલિખેત્ ॥ ૧૩.૫॥

તતઃ અનયૈવ રીત્યા સાદિચતુષ્ટયં ષટ્ષડ્વારં લિખેત્ ॥ ૧૩.૬॥

કાદિત્રયં દ્વિદ્વિવારં લિખેત્ ॥ ૧૩.૭॥

લકારમાયાં ચ એકૈકવારં લિખેત્ ॥ ૧૩.૮॥

એવં સતિ દ્વિતીયપઙ્ક્તૌ એકમક્ષરં ન્યૂનં સમ્પદ્યતે ॥ ૧૩.૯॥

તં લકારં પઞ્ચમસ્થાને લિખેત્ ॥ ૧૩.૧૦॥

પ્રથમપઙ્ક્તિસ્તુ પૂર્વમેવ પૂર્ણાસ્તીતિ ન તત્ર લેખનપ્રસક્તિઃ ॥ ૧૩.૧૧॥

તૃતીયાદિષુ પઙ્ક્તિષુ દ્વૌ દ્વૌ વર્ણૌ ન્યૂનૌ ભવતઃ,
તાવેકસ્યાં પઙ્ક્તૌ ક્રમાદ્વિલિખ્ય તદધસ્તનપઙ્ક્તૌ વ્યુત્ક્રમાત્
તાવેવ લિખેત્ ॥ ૧૩.૧૨॥

પુનસ્તનપઙ્ક્તિદ્વયે વિશિષ્ટૌ ધ્રુવૌ તૌ ક્રમાન્ ક્રમાભ્યાં
લિખેત્ ॥ ૧૩.૧૩॥

એવમાન્તકરણેનૈકઃ પ્રસ્તારખણ્ડો ભવતિ ॥ ૧૩.૧૪॥

યાવન્તો ધ્રુવાસ્તાવન્ત એવ તત્પ્રસ્તારસ્ય ખણ્ડાઃ
સમસઙ્ખ્યાવૃત્તકા ભવન્તિ ॥ ૧૩.૧૫॥

તેષ્વાદ્યે ખણ્ડે વૃત્તાદ્યો ધ્રુવાદ્ય એવ, દ્વિતીયે ખણ્ડે
ધ્રુવદ્વિતીય એવ વૃત્તાદ્યઃ, તૃતીયે ખણ્ડે ધ્રુવતૃતીય એવેત્યપિ
નિયમોઽસ્તિ ॥ ૧૩.૧૬॥

તતશ્ચ દ્વિતીયખણ્ડપ્રથમવૃત્તે પૂર્વ એવ ક્લૃપ્તદ્વિતીયસ્ય
સકારાત્ પરતઃ સંસ્થાપયેત્ ॥ ૧૩.૧૭॥

એવં તૃતીયખણ્ડાદિમવૃત્તે કહસલહ્રીમિતિ ક્રમઃ ॥ ૧૩.૧૮॥

ચતુર્થખણ્ડાદૌ લહસકહ્રીં પઞ્ચમખણ્ડાદૌ હ્રીં
હસકલ ઇતિ ક્રમઃ ॥ ૧૩.૧૯॥

પ્રથમખણ્ડાન્તતૃતીયવૃત્તેઽપિ યૌ દ્વૌ શિષ્યેતે તૌ
દ્વાવપિ કહ્રીમિતિ લેખ્યૌ પ્રથમવૃત્તે તયોઃ પૌર્વાપર્યસ્ય ક્લૃપ્તસ્ય
ત્યાગે માનાભાવાત્ ॥ ૧૩.૨૦॥

એતેન નવમાદિવૃત્તેષ્વપિ સકારહ્રીઙ્કારયોઃ ક્રમેણ
લેખ ઇત્યાદિ સિધ્યતિ ॥ ૧૩.૨૧॥

તત્તત્ખણ્ડદ્વિતીયાદિવૃત્તાનિ પ્રથમખણ્ડવદેવ લેખનીયાનિ ॥ ૧૩.૨૨॥

યાવત્પ્રથમખણ્ડાદ્યવૃત્તાક્ષરાણિ વ્યુત્ક્રમેણ પતન્તિ તાવત્પર્યન્તોઽયં
પ્રસ્તારઃ પ્રથમવૃત્તપ્રથમાક્ષરશિરોઙ્કો ધ્રુવાર્ણસઙ્ખ્યયા
ગુણિતશ્ચેત્ પ્રસ્તારવૃત્તસઙ્ખયાપિ નિષ્પદ્યતે ॥ ૧૩.૨૩॥

તેન પઞ્ચધ્રુવકે ચતુર્વિંશતિઃ ચતુર્ધ્રુવકે ષટ્ દ્વિતીયધ્રુવકે
દ્વૌ એકધ્રુવકે એકં - ઇતિ શિવમ્ ॥ ૧૩.૨૪॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે

પ્રસ્તારક્રમ નામ ત્રયોદશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૩ ॥

---

ચતુર્દશઃ ખણ્ડઃ નષ્ટોદ્દિષ્ટકથનમ્

અથાતો નષ્ટોદ્દિષ્ટં વ્યાખ્યાસ્યામઃ ॥ ૧૪.૧ ॥

હસકલહ્રીં ઇત્યેષાં પઞ્ચાનામક્ષરાણાં ધ્રુવપ્રસ્તારે
વિંશત્યધિકશતં વૃત્તાનિ તેષુ ચતુરશીતિતમવૃત્તજિજ્ઞાસાયાં
ચતુરશીતિસઙ્ખ્યૈવ નષ્ટોઽઙ્કઃ ॥ ૧૪.૨ ॥

ખણ્ડાઙ્કાસ્તુ ચતુર્વિંશતિઃ ષટ્ (દ્વે) એકં શૂન્યં ચેતિ
પૂર્વમેવોક્ત્યા તેનૈકૈકેન નષ્ટાઙ્કં વિભજેત્ ॥ ૧૪.૩ ॥

તથા ચતુર્વિંશત્યા ચતુરશીતેર્હરણે ત્રયો લબ્ધાઃ
દ્વાદશશિષ્ટાસ્તતઃ ષડ્ભિઃ દ્વાદશાનાં હરણે યદ્યપિ નિશ્શેષતા
ભવતિ તથાઽઽપિ વિભાજકાનાં સશેષત્વાદત્રાપ્યેકં ષટ્કમવશેષ્યં
તેનૈકલબ્ધં ષટ્ ષષ્ઠા તતો દ્વાભ્યાં ષણ્ણાં હરણે સાવશેષ
વિભજનેન દ્વૌ લબ્ધૌ દ્વૌ શિષ્ટૌ તત એકેન સશેષહરણે એકં
લબ્ધં એકં શિષ્ટમ્ । તસ્ય શૂન્યેન વિભજનેન શૂન્યં લબ્ધં
શૂન્યં શિષ્ટં તેન ત્ર્યેકદ્વયેકશૂન્યાનિ લબ્ધાઙ્કાઃ - એતે પ્રત્યેકં
સૈકા કાર્યાઃ । તેન ચતુર્દ્વિત્રિદ્વયેકાઙ્કા ભવન્તિ ॥ ૧૪.૪ ॥

તતશ્ચ પૂર્વક્લૃપ્તક્રમેષુ હસકલહ્રીં ઇત્યાકારકેષુ
ધ્રુવવર્ણેષુ ચતુર્દ્વિદ્વયેકસઙ્ખ્યાવર્ણાસ્તાન્ સઙ્ખ્યયાયૈ નિષ્કાસ્ય
પૃથક્ લિખેત્ ॥ ૧૪.૫ ॥

યથા વાગ્બીજાત્મકબીજચતુર્થે લકારઃ ॥ ૧૪.૬ ॥

સજિજ્ઞાસિતવૃત્તે પ્રથમો વાગ્બીજાત્મકે દ્વિતીયઃ
સકાર એવ તત્ર દ્વિતીયઃ ॥ ૧૪.૭ ॥

અથાનયોઃ લકારસકારયોઃ પૂર્વલિખિતત્વાત્ પરિત્યાગે
ગણને વાગ્બીજપઞ્ચમ એવ તૃતીયો ભવતિ ॥ ૧૪.૮ ॥

માયયૈવ જિજ્ઞાસિતવૃત્તે તૃતીયા કથકવર્ગાત્
દ્વિતીયોપાત્તસકારપરિત્યાગેન ગણનયા કકાર એવ પૂર્વો
ભવતીતિ સ તત્ર ચતુર્થઃ ॥ ૧૪.૯ ॥

વાગ્બીજસ્ય પ્રથમો હકારઃ સ તત્ર પઞ્ચમો ભવતીતિ લસહ્રીકુહ ઇત્યાકારકં ચતુરશીતિતમં વૃત્તં નિષ્પદ્યતે - ઇતિ શિવમ્ ॥ ૧૪.૧૦॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે નષ્ટોદ્દિષ્ટકથન નામ ચતુર્દશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૪॥

---

પઞ્ચદશઃ ખણ્ડઃ કૃતનષ્ટનિરૂપણમ્

ઇત્થં કૃતનષ્ટો લસહ્રીકુહ ઇત્યાકારકં વૃત્તં પઞ્ચ-ધ્રુવપ્રસ્તારે કતિતમમિતિ જિજ્ઞાસાયાં તદ્વૃત્તં ભૂમૌ વિલિખ્ય તચ્છિરસિ ખણ્ડાઙ્કાન્ લિખેત્ ॥ ૧૫.૧॥

તે યથા - ચતુર્વિંશતિઃ ષટ્ દ્વે એકં શૂન્યં ચેતિ ॥ ૧૫.૨॥

તે ચ લકારાદયઃ વર્ણાઃ ક્લૃપ્તક્રમેષુ હસકલહ્રીં - ઇત્યાકારકેષુ પઞ્ચસુ ધ્રુવવર્ણેષુ પૂર્વલિખિતપરિત્યાગેન ગણનયા ચતુર્થદ્વિતીયતૃતીયદ્વિતીયપ્રથમાઃ ક્રમેણ ભવન્તિ ॥ ૧૫.૩॥

તેન તેષ્વઙ્કેષુ પ્રત્યેકમેકાઙ્કનિરાસે સતિ ત્ર્યેકદ્વ્યેકશૂન્યાનિ સમ્પદ્યન્તે ॥ ૧૫.૪॥

તે ચાઙ્કાઃ લકારાદીનામધઃ ક્રમાલ્લેખ્યાઃ ॥ ૧૫.૫॥

અથ અધોઙ્કેનોર્ધ્વાઙ્કં ગુણયિત્વા તત્તદક્ષરા-ધોઙ્કાધઃક્રમેણ લિખેત્ ॥ ૧૫.૬॥

યથા ચતુર્વિંશતિસ્ત્રિભિર્હનનાત્ દ્વાસપ્તતિભિઃ ષણ્ણા-મેકેન હનનાત્ ષટ્ દ્વયોર્દ્વાભ્યાં ઘાતે ચત્વારઃ એકસ્યૈકેન હનને એકં શૂન્યસ્ય શૂન્યેન ગુણને શૂન્યં એવમેતેષાં સર્વેષાં મેલને ત્ર્યશીતિઃ તેષ્વઙ્કાઙ્કપ્રક્ષેપે ચતુરશીતિઃ સમ્પદ્યતે - ઇતિ શિવમ્ ॥ ૧૫.૭॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-

શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
કૃતનષ્ટનિરૂપણ નામ પઞ્ચદશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૫ ॥

---

## ષોડશઃ ખણ્ડઃ યોનિલિઙ્ગયન્ત્રરચનાવિધાનમ્

અથાતો યોનિયન્ત્રં વ્યાખ્યાસ્યામઃ ॥ ૧૬.૧ ॥

સ્વેષ્ટમાનેન ત્રિકોણં વિલિખ્ય, તિસૃષુ રેખાસુ
દશદશ ચિહ્નાનિ સમાંશાઙ્કાનિ કૃત્વા, તેષુ દશદશસૂત્રાણિ
પાતયેત્ ઇત્યેકવિંશત્યધિકશતસઙ્ખ્યાકાઃ પ્રસ્તોત્પન્નભેદા
ભવન્તિ તે તત્ર લેખ્યાઃ સર્વમધ્યત્રિકોણે કર્મ લેખ્યમ્ ॥ ૧૬.૨ ॥

ઇત્થં યોનિચક્રં વિધાય, લિઙ્ગચક્રં વ્યાકુર્મઃ ॥ ૧૬.૩ ॥

પૂર્વં એકં ચતુષ્કોષ્ઠાત્મકં કોષ્ઠં વિલિખ્ય, તદધઃ
કોષ્ઠત્રયં તદધઃ પઞ્ચ તદધઃ પાર્શ્વયોઃ ષટ્ ષટ્વિહાય
યથાસમ્પ્રદાયં ચત્વારિંશત્કોષ્ઠાત્મકં લિઙ્ગં વિલિખ્ય, તત્સંલગ્નં
ચતુરશ્રદ્વયં વહ્ન્યાદિકોણચતુષ્ટયં કોષ્ઠચતુષ્ટયવિશિષ્ટં
વિલિખ્ય, તત્ર સમ્પ્રદાયેન વાગ્ભવે બીજભેદાન્ વિંશત્યધિક-
શતસઙ્ખ્યાકાન્ પ્રસ્તારસઞ્જનિતાન્ વિલિખ્ય, વિશિષ્ટેષુ
તૃતીયબીજસ્ય પ્રસ્તારસઞ્જનિતચતુર્વિંશતિભેદાન્ વિલિખેત્ ॥

અથ ચતુરશ્રદ્વયાન્તરાલે ષડ્રેખાયા(પા)તનેન સપ્તકોષ્ઠાન્
સંવિધાય, તત્ર દિનનિત્યાયુગનિત્યાક્ષરાણિ ષટ્ સંવિલિખ્ય,
શિષ્ટે કોષ્ઠે ચોદયાક્ષરં વિલિખ્ય તત્રાવાહ્ય પૂજયેત્ - ઇતિ
શિવમ્ ॥ ૧૬.૫ ॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
યોનિલિઙ્ગયન્ત્રરચનાવિધાન નામ ષોડશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૬ ॥

---

## સપ્તદશઃ ખણ્ડઃ અઙ્ગવિદ્યા

અથાતઃ સર્વમઙ્ગવિદ્યાયાઃ સ્વરૂપબાહુલ્યોપદેશં તદ્વિ-
નિયોગપ્રસ્તાવં ચ કરોતિ ॥ ૧૭.૧॥

તત્ર વાતાદ્યૈઃ ગ્રાસમયાન્તૈઃ અકારાદ્યૈઃ ક્ષકારાન્તૈઃ
માતૃકાવિસરાક્ષરૈઃ પ્રોક્તસઙ્ખ્યૈરિત્યર્થઃ ॥ ૧૭.૨॥

શતૈઃ પઞ્ચભિઃ અકારાદીનાં ષોડશસ્વરાણાં કકારાદીનાં
ચ પઞ્ચત્રિંશતાં ક્ષકારાન્તાનાં પ્રત્યેકં ષોડશસ્વરયો-
જનતઃ ષોડશાનાં ષોડશાનામપ્યેવં ષટ્સપ્તત્યધિકપઞ્ચશત-
સઙ્ખ્યાનાં માતૃકાવિસરાક્ષરાણાં મૂલવિદ્યાયાઃ આદૌ ક્રમશઃ
પ્રત્યેકં યોજનતઃ ષટ્સપ્તત્યધિકપઞ્ચશતસઙ્ખ્યાવિદ્યારૂપાણિ
સન્તીતિ તસ્યાનવસ્થાને મૂલવિદ્યાયાશ્ચતુર્દશસ્વરસ્થાને
સ્વરાન્ ષોડશ યોજયેત્ ॥ ૧૭.૩॥

પૂર્વોક્તૈર્વિદ્યાદિયોજિતૈઃ ષટ્સપ્તત્યધિકપઞ્ચશતૈરક્ષરૈઃ
તત્સઙ્ખ્યારૂપભેદાય અન્ત્યે પ્રત્યેકં ક્રમાત્ ષોડશસ્વરયો-
જનતઃ ષોડશાધિકદ્વિશતોત્તરનવસહસ્રસઙ્ખ્યાવિદ્યારૂપાણિ
ભવન્તીતિ તૈઃ સમ્પ્રોક્તસઙ્ખ્યૈઃ વિદ્યારૂપૈઃ પ્રયોજયેદ્યન્ત્રૈરિતિ
આદૌ વૃત્તત્રયં તદ્બહિઃ ષટ્કોણં તદ્બહિરષ્ટદલં વિધાય
તદ્બહિર્વૃત્તત્રયં વિદધ્યાત્ ॥ ૧૭.૪॥

તેષુ વિદ્યાકૂટાનુક્તક્રમેણ ન્યસેત્ ॥ ૧૭.૫॥

તેષ્વાદ્યં મધ્યતઃ સાધ્યસમેતં વિલિખેત્ ॥ ૧૭.૬॥

ષટ્કોણેષુ ચત્વારિ ચત્વારિ વિલિખેત્ ॥ ૧૭.૭॥

અષ્ટચ્છદેષુ પ્રત્યેકં પઞ્ચપઞ્ચ સમાલિખેત્ ॥ ૧૭.૮॥

બહિર્વૃત્તાન્તરયુગે માતૃકાં માયયા ચિતાં વિલોમામનુલોમાં સ્વેન
સમ્યક્ સમાલિખેત્ ॥ ૧૭.૯॥

અન્તઃષડન્તરાલેષુ પર્યાયદિનસમ્ભવે નિત્યે લિખેત્ ॥ ૧૭.૧૦॥

પ્રાદક્ષિણ્યેન સર્વત એવં યન્ત્રાણિ જાયન્તે ॥ ૧૭.૧૧॥

તૈઃ કૂટૈરુક્તયોગતઃ શતં ચ ચત્વારિંશચ્ચ ચત્વારિ ચ
તતઃ ક્રમાદિતિ વૃતં, એવમન્યાનિ કૂટાનિ પ્રોક્તાનિ ક્રમેણ

વિલિખેત્ ॥ ૧૭.૧૨॥

મધ્યે નામસમેતાનિ તદન્યાન્યભિતો લિખેત્ ॥ ૧૭.૧૩॥

ત્રયોદશમિતૈર્લક્ષ્યૈઃ સપ્તવિંશતિસઙ્ખ્યાકૈઃ સહસ્રૈશ્ચ
શતેનાપિ ચતુર્ભિઃ તાનિ સઙ્ખ્યયા યન્ત્રાણિ જાયન્તે ॥ ૧૭.૧૪॥

તૈશ્ચ સા સર્વમઙ્ગલા એવં કામેશ્વર્યાદિષોડશનિત્યાનાં
પૃથક્ પૃથક્ યન્ત્રાણિ સ્યુઃ ॥ ૧૭.૧૫॥

તસ્માદાભિરસાધ્યાનિ ન કદાચિચ્ચ કુત્રચિત્ વિદ્યતે
તેષુ યત્કિઞ્ચિત્ વક્ષ્યે કોશેષુ તોન્યૈ વદેન્નાથાત્મકાનિ યેન
સ્યુસ્તેન ચ મૈર્ભિત્ત્વા ષોડશધા મન્ત્રી વિદધ્યાત્ ॥ ૧૭.૧૬॥

વિનિયોજકં વિશાલમધ્યવિન્યાસં વિદધ્યાત્ ॥ ૧૭.૧૭॥

નવકોષ્ઠકં પ્રાગાદિમધ્યપર્યન્તં પ્રાદક્ષિણ્યક્રમાલ્લિખેત્ ॥ ૧૭.૧૮॥

નવાનિ નવસુ પ્રાજ્ઞસ્તેષુ ઋક્ષાણિ ચાલિખેત્ ।
સપ્તમ્યા સાધ્યસંયુક્તં નાથાં દેવીશ્ચ તત્ક્રમાત્ ॥ ૧૭.૧૯॥

યદ્યદ્ધિ (દ્ધિ) વાઞ્છિતં કર્મ તત્તત્તેષુ વિલિખ્ય વૈ ।
પીઠે વા ભૂતલે વાઽપિ પૂજયેત્ પ્રોક્તવાસરમ્ ॥ ૧૭.૨૦॥

તતઃ પ્રાપ્તે વાઞ્છિતાર્થે સ્વાત્મન્યુદ્વાસ્ય દેવતાઃ ।
ચક્રં પ્રક્ષાલ્ય તત્તોયં કેદારાદિષુ નિક્ષિપેત્ ॥ ૧૭.૨૧॥

એવમન્યાનિ યન્ત્રાણિ પ્રોક્તાનિ ક્રમશો ભુવિ ।
વિનિયોજ્યાન્યભીષ્ટેષુ કાર્યેષૂક્તક્રમેણ વૈ ॥ ૧૭.૨૨॥

પરસઙ્ખ્યાસમેતાનિ તેષુ તેષ્વપ્યયં વિધિઃ ।
સર્વતઃ સૌમ્યકર્માણિ સિદ્ધ્યન્તે વાઽનયા દ્રુતમ્ ॥ ૧૭.૨૩॥

વશ્યેષુ જ્ઞાનસમ્પત્ત્યૈ સર્વપ્રત્યૂહશાન્તયે ।
લક્ષ્મીપ્રાપ્તૌ તથારોગ્યસિદ્ધૌ રોગાર્તિશાન્તિષુ ॥ ૧૭.૨૪॥

વિજયાય સમસ્તાપત્તરણાયાભિવૃદ્ધયે ।
પુત્રાવાપ્ત્યૈ ચ રક્ષાયૈ પૂજયેત્ તેષુ તત્ક્રમાત્ ॥ ૧૭.૨૫॥

ગજાશ્વગોખરોષ્ટ્રાજમહિષીણાં વિવૃદ્ધયે ।

તેષાં રોગાદિપીડાસુ તચ્છાન્ત્યૈ ચ યથાક્રમમ્ ॥ ૧૭.૨૬॥

નિર્માય નવયન્ત્રાણિ તત્ર તત્રાર્ચયેચ્છિવામ્ ।
તેષુ તેષૂક્તકાર્યેષુ તત્તત્સમ્પ્રાપ્તિહેતવે ॥ ૧૭.૨૭॥

નવપ્રકારયુક્તાનિ ષોડશપ્રથમાદિષુ ।
તિથિષુ પ્રોક્તરૂપાણિ તત્ર તાં સર્વમઙ્ગલામ્ ॥ ૧૭.૨૮॥

પૂજયેત્ કાઙ્ક્ષિતાવાપ્ત્યૈ તેન સર્વસિદ્ધિર્ભવેદિતિ શિવમ્ ॥ ૧૭.૨૯॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક-
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
અઙ્ગવિધા નામ સપ્તદશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૭॥

---

અષ્ટાદશઃ ખણ્ડઃ વાસનાધ્યાયઃ

અથાતો વાસનાં વ્યાખ્યાસ્યામઃ ॥ ૧૮.૧॥

તદાત્મકં સમુદયં મદાત્મિકાપિ વિશ્રિતમ્ ।
હયાત્મકં આત્મસ્વરૂપં તૈર્ભાવયેત્ ॥ ૧૮.૨॥

કાલેનાન્યત્વદુઃખાર્તિવાસનાશતશો ધ્રુવમ્ ।
પરાહન્તામયં સર્વસ્વરૂપસ્વાત્મવિગ્રહમ્ ॥ ૧૮.૩॥

સદાત્મકં સ્ફુરત્તાખ્યં અશેષોપાધિવર્જિતમ્ ।
પ્રકાશરૂપમાત્મત્વે વસ્તુ સદ્ભાસતે પરમ્ ॥ ૧૮.૪॥

વરયન્તે એવમતો લોકે નાન્યત્ર મન્ત્રવદક્ષરમ્ ।
યદ્વિદ્યેતિ હિ મન્વીત સર્વધા સર્વતઃ સદા ॥ ૧૮.૫॥

અથ મન્ત્રાર્થઃ-
લલિતાયાસ્ત્રિભિર્વર્ણૈઃ સકલાર્થોઽભિધીયતે ।
શેષેણ દેવીરૂપેણ તેન સ્યાદિદમીરિતમ્ ॥ ૧૮.૬॥

અશેષતો જગત્ કૃત્સ્નં હૃલ્લેખાત્મકતઃ પરમ્ ।
તસ્યાશ્ચાર્થસ્તુ કથિતઃ સર્વતન્ત્રેષુ ગોપિતઃ ॥ ૧૮.૭॥

વ્યોમ્ના પ્રકાશમાનત્વં ગ્રસમાનત્વમગ્નિના ।

તે યો વિમર્શ ઈકાર બિન્દુના તન્નિફાલનમ્ ॥ ૧૮.૮॥

૧. હ્રીં શ્રીં અં કામેશ્વરીપાદુકાં પૂજયામિ ।
૨. હ્રીં શ્રીં આં ભગમાલિનીપાદુકાં પૂજયામિ
૩. હ્રીં શ્રીં ઇં નિત્યક્લિન્નાપાદુકાં પૂજયામિ ।
૪. હ્રીં શ્રીં ઈં ભેરુણ્ડાપાદુકાં પૂજયામિ ।
૫. હ્રીં શ્રીં ઉં વહ્નિવાસિનીપાદુકાં પૂજયામિ ।
૬. હ્રીં શ્રીં ઊં મહાવજ્રેશ્વરીપાદુકાં પૂજયામિ
૭. હ્રીં શ્રીં ઋં શિવદૂતીપાદુકાં પૂજયામિ ।
૮. હ્રીં શ્રીં ૠં ત્વરિતાપાદુકાં પૂજયામિ ।
૯. હ્રીં શ્રીં ઌં કુલસુન્દરીપાદુકાં પૂજયામિ ।
૧૦. હ્રીં શ્રીં ૡં નિત્યાપાદુકાં પૂજયામિ ।
૧૧. હ્રીં શ્રીં એં નીલપતાકાપાદુકાં પૂજયામિ ।
૧૨. હ્રીં શ્રીં ઐં વિજયાપાદુકાં પૂજયામિ ।
૧૩. હ્રીં શ્રીં ઓં સર્વમઙ્ગલાપાદુકાં પૂજયામિ ।
૧૪. હ્રીં શ્રીં ઔં જ્વાલામાલિનીપાદુકાં પૂજયામિ
૧૫. હ્રીં શ્રીં અં ચિત્રાપાદુકાં પૂજયામિ ।
૧૬. હ્રીં શ્રીં અઃ ત્રિપુરસુન્દરીપાદુકાં પૂજયામિ ॥ ૧૮.૯॥

શઙ્કુચ્છાયયા દિક્પરિજ્ઞાનક્રમં પ્રસ્તાવસહિતં
ઉપદિશતિ ॥ ૧૮.૧૦॥

તત્ર ભાનોર્ગત્યા આદિત્યદક્ષિણોત્તરાયણક્રમગતિ-
ભેદજ્ઞાનચ્છાયયેતિ યાવત્ ॥ ૧૮.૧૧॥

તન્મધ્યં બિન્દુમધ્યં ઇત્યેતત્ક્રિયાવિશેષણમ્ ॥ ૧૮.૧૨॥

પૂર્વાપરદ્વયે પૂર્વાપરાત્મિકયોઃ દિશોઃ પ્રાગવચ્છિન્ને
કૃત્વેત્યર્થઃ ॥ ૧૮.૧૩॥

તદભિમતઃ તદ્દ્વયમવષ્ટભ્ય સમમાનપારભ્રાન્ત્યા તચ્ચિ-
હ્નદ્વયાન્તરાલમાનપરિભ્રાન્ત્યાં સ્વેચ્છાધિકેનાર્ધેન માનેન
અન્યોન્યતુલ્યેન પરિભ્રાન્ત્યાં કૃત્વા વૃત્તદ્વયં કૃત્વેત્યર્થઃ ॥ ૧૮.૧૪॥

તયોઃ પૂર્વાપરયોઃ સંશ્લેષસઞ્જાતમધ્યદક્ષોત્તરસ્થિત
ઇત્યસ્ય ઉત્તરત્ર સન્ધિદ્વયે ઇત્યેતે વિશેષં પ્રાક્પ્રત્યક્

સૂત્રમધ્યે પ્રાક્પ્રત્યગાત્મસૂત્રમધ્યે તુ સંહારે દક્ષોત્તરં
દક્ષિણોત્તરં તેષાં મણ્ડપાદીનામગ્રૈઃ સૂત્રાગ્રૈઃ ॥ ૧૮.૧૫॥

એતદુક્તં ભવતિ - જીમૂતાદ્યપરિવેષ્ટિતભાનૌ દિવસે
છાયાદિભિરનાવૃતદેશે જલયન્ત્રાદિભિઃ સુસમીકૃતસ્ય દર્પ-
ણોદરસઙ્કાશસ્ય ભૂતલસ્ય મધ્યે બિન્દું કૃત્વા તદવષ્ટમ્ભતઃ
પ્રતિદિશં દ્વાદશાઙ્ગલમાનેન વૃત્તં કૃત્વા તત્ર ષડઙ્ગલમાન-
પરિણાહમૂલમુત્તરોત્તરપરિણાહાપચયેન સૂચીમાત્રીકૃતાગ્ર -
પરિણાહં મૃદ્વાકૃતિં શઙ્કુમૂલમાનોચ્છ્રા(છ્રા)યસહિતં વૃત્તાકારં
શિલ્પિવરેણ નિર્મિતં વૃત્તમધ્યસ્થબિન્દુમધ્યે યથા શઙ્કુમૂલ-
પરિણાહમધ્યં ભવતિ તથા તચ્છઙ્કુચ્છાયાગ્રસ્ય પૂર્વાહ્ણે
તત્તદ્વૃત્તરેખાપશ્ચિમભાગે યત્ર સમ્પાતસ્તત્ર તતોઽપરાહ્ણે
તચ્છઙ્કુચ્છાયાગ્રસ્ય તદ્વૃત્તરેખાપૂર્વભાગે ચિહ્નં વિધાય
તચ્ચિહ્નદ્વયં પ્રાપયત્ સૂત્રં તત્પૂર્વાપરં પરિકલ્પ્ય તચ્ચિહ્નદ્વયા-
વષ્ટમ્ભેન તચ્ચિહ્નાન્તરાલમાનસ્ય ચેષ્ટાધિકેનાર્ધમાનેનાન્યોન્ય-
સમેતે કિઞ્ચિદન્યોન્યસંશ્લિષ્ટં પૂર્વાપરં વૃત્તદ્વયં વિધાય
તદ્વૃત્તરેખાદક્ષિણોત્તરસન્ધિદ્વયપ્રાપિ પ્રાક્પશ્ચિમસૂત્રમધ્ય -
ગત્યા તિર્યગ્રૂપેણ યત્ સૂત્રં દક્ષિણોત્તરં પરિકલ્પ્ય તત્પ્રાક્
પ્રત્યક્દક્ષિણોત્તરસૂત્રદ્વયસમ્પાતાદ્વૃત્તવક્ષ્યમાણમાનેન તુલ્ય-
રૂપપરિકલ્પિતસૂત્રાગ્રૈસ્તૈસ્તેષાં મણ્ડપાદીનાં પ્રાક્પ્રત્યગ્દ-
ક્ષિણોત્તરાત્મકદિક્ચતુષ્ટયં પરિકલ્પયેત્ ॥ ૧૮.૧૬॥

સર્વપ્રયત્નેન વિદ્યાઽઽરાધિતદ્વારા પૂર્ણતાખ્યાતિસમા-
વેશનેચ્છા ચેત્યેતે સમયાચારિકાઃ । પરે ચ શાસ્ત્રાનુશિષ્ટાઃ ॥ ૧૮.૧૭॥

ઇત્થં વિદિત્વા વિધિવદનુષ્ઠિતવતઃ કુલનિષ્ઠસ્ય
સર્વતઃ કૃતકૃત્યતા શરીરત્યાગે શ્વપચગ્રહકાશ્યોર્નાન્તરં
જીવન્મુક્તો ભવતિ ॥ ૧૮.૧૮॥

ય ઇમામષ્ટાદશખણ્ડીં મહોપનિષદં મહાત્રૈપુર-
સિદ્ધાન્તસર્વસ્વભૂતામધીતે સ સર્વેષુ યજ્ઞેષુ યષ્ટા ભવતિ ।
યં યં ક્રતુમધીતે તેન તેનાસ્યેષ્ટં ભવતિ ઇતિ હિ શ્રૂયતે
ઇત્યુપનિષત્ - ઇતિ શિવમ્ ॥ ૧૮.૧૯॥

ય એવં વેદેત્યુપનિષત્ ॥ ૧૮.૨૦॥

ભદ્રં નો અપિ વાદય મનઃ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૧૮.૨૧॥

ઇતિ રેણુકાગર્ભસમ્ભૂત-શ્રીદુષ્ટક્ષત્રિયકુલાન્તક
શ્રીભાર્ગવોપાધ્યાય-જામદગ્ન્ય-મહાદેવપ્રધાનશિષ્ય-
મહાકૌલાચાર્ય-શ્રીમત્પરશુરામકૃતૌ-કલ્પસૂત્રે
વાસના નામાષ્ટાદશઃ ખણ્ડઃ સમાપ્તઃ ॥ ૧૮॥

ઇતિ શ્રીપરશુરામકલ્પસૂત્રપરિશિષ્ટં દ્વિતીયભાગઃ સમ્પૂર્ણમ્ ॥

ઇતિ શ્રીદુષ્ટક્ષત્રિયકુલકાલાન્તકરેણુકાગર્ભસમ્ભૂત
મહાદેવપ્રધાનશિષ્યજામદગ્ન્યશ્રીપરશુરામભાર્ગવ-
મહોપાધ્યાયમહાકુલાચાર્યનિર્મિતં કલ્પસૂત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread
first part by Claudia Weber (available at GRETIL) and second by DPD
Reference : Parasurama-Kalpasutra
(a digest of Srividya, as system of worship of the Divine Mother)
Based on the ed. by A. Mahadeva Sastri, Baroda : Central Library 1923
(Gaekwad's Oriental Series, 22)

.. Shri Parashurama Kalpasutram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*